
PARINAYA MÎMÂMSÂ

OR

"An enquiry into the teaching of the Sastras as regards the question of marriage."



BY

K. G. NATESA SASTRI

son of

GURUSWAMI SASTRIAR

of

KADAYAM, (TINNEVELLY.)



SRIRANGAM:

SRI VANI VILAS PRESS.

1913.

Price Twelve Annas.] [*Postage extra.*

॥ श्रीः ॥

॥ परिणयमीमासा ॥

श्रीवाधूलकुलवंशेन गुरुस्वामिसूनुना

कडयंग्रामवासिना

नटेशेन

विरचिता ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायत्रालये

संमुद्रिता ।

शाकाब्दाः—१८३५.] [खिस्ताब्दाः—१९१३.

मूल्यं पादोनरूप्यकम् ।

PREFACE

CERTAIN passages in the Smritis and the Vedas, whose meaning seems to be ambiguous, are examined in this book in the light of the "Mimamsa system of Interpretation." The merits of the Mimamsa system can never be over-estimated. As has been justly remarked by Mr. Kisore Lal Sarcar M.A., B.L. of the Calcutta Bar in his "Tagore Law Lectures" for the year 1905, this subject cannot be better introduced than in the language of Sir John Edge C. J, who with reference to a question of Hindu Law arising before him, observed as follows:—

"The question is how is the text of Vasishta to be construed. It must clearly be construed according to the rules for the construction of the texts of the sacred books of the Hindu Law, if authoritative rules on the subject exist. That rules for the construction of the sacred texts and law of the Hindus do exist cannot be disputed, although, those rules have been frequently overlooked, or not referred to by Judges or English text-writers, probably because they are in Sanskrit and have, so far as I am aware, not yet been translated. That they are rules of the highest authority is obvious from the manner in which they have been referred to by Mr. Colebrooke."

Mr. Colebrooke has the following about Mimamsa. He says—

"The logic of the Mimamsa is the logic of the law—the rule of interpretation of civil and religious ordinances. Each case is examined and determined upon general principles; and from the cases decided the principles may be collected. A well ordered arrangement of them would constitute the philosophy of the law, and this is, in truth, what has been attempted in the Mimamsa."

We have classified the ancient texts under the three heads of the Vedas, the Grihya Sutras or household maxims (as Professor Maxmuller would have it), and the Smritis, and considered, to the best of our knowledge impartially, whether the question of marriage for girls after attaining puberty can be fairly maintained on the authority of any of the three above mentioned heads, and have arrived at the conclusion that it cannot be maintained on any authority. As regards the relative force of "Srauta Linga" and "Smarta Sruti" of which much ado has been made during recent years, we may rest satisfied with merely quoting the view of Mr. Kisore Lal Sarcar that eminent Vakil of the Calcutta High Court. He remarks. "With regard to the condition that an usage should not be contradicted by the Sruti or by a valid Smriti, you should understand that an usage is contradicted by the Sruti only when it is contradicted by any obligatory text of it. It is not contradicted by the Sruti if only there are Arthavadas and the like opposed to it." Again in the eighth lecture he says "Jaimini says, 'independantly of any consideration of reason, that which has been in vogue must prevail'.....Their Lordships of the Privy Council unconsciously reiterate the above mentioned Mimamsa principle in favour of the authority of current customs and of current legal treatises in the *Collector of Madura vs. Muttu Ramalinga Setupaty.* 12 M. I. A. 437." In the tenth lecture he again observes "Their Lordships of the Privy Council lay down (in the above mentioned case) the following general rules. (*a*) Under the Hindu system of Law clear proof of usage will outweigh the written text of law. (*b*) No weight should be given to texts from works unknown and of doubtful authority. (*c*) Sanctioned usage may be evidenced by opinions of Pundits and decided cases. Continuing he observes "you will observe that the principles laid down by their Lordships substantially accord with the principles of the Mimamsa Sastra. You have seen that what the Mimamsa writers inculcate under the head of *Padartha prabalyadhikarana* and what Jaimini says in the leading Sutra of

that Adhikarana *viz.*, 'without reference to causes, usages prevail' correspond to principles 1 and 2. And as regards the third principle touching the question of evidence, what the Mimamsakas and the Smriti writers lay down under the head of Sishtachara supports this principle."

We humbly request our readers to kindly bear in mind that the question we undertook to solve in this book is not whether Post-puberty Marriage is essential for our national prosperity, but whether such a marriage is within the contemplation of those ancient sages who wrote the Smritis etc. Hence those who are in favour of such a marriage need not entertain any sort of unfriendly feeling towards us as we do not encroach upon their boundaries. If we have succeeded in convincing the public of our faultlessly representing what would be the correct view of the ancient Lawgivers on this question of Marriage, our task is done; and our deep debt of obligation to them for their patience in going through the pages can neither be easily rated nor sufficiently discharged.

As a translation of this work in English is desired we reserve our further remarks for that publication.

Mistakes have crept in though pains were taken to wipe off the errors, and so an errata has been appended. We request our readers to be kind enough to have the errors corrected completely before commencing to make a study.

We would be simply doing injustice to our conscience if we omit to mention our deep debt of gratitude to those gentlemen who have helped us in several ways in bringing out the work, especially to the members of the Sri Vani Vilas Press, Srirangam for having undertaken to bring out the work neatly executed in a short time and to our friends who have helped us in correcting the proofs.

MYLAPORE,
Sunday the 7th September 1913.

K. G. Natesa Sastri.

॥ श्रीः ॥

॥ परिणयमीमांसा ॥



ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंश-
ऋषिभ्यो नमो गुरुभ्यः ॥

अवाप्य ब्रह्मविद्यां ये बालकृष्णमखीन्द्रतः ।
प्रबोधेनान्वगृह्णन्नः श्रीतातचरणान्नुमः ॥

गर्भाष्टमं वयो हि स्त्रीणामुद्वाहकर्मणि प्रधानभूतः काल इति श्रुतिस्मृतिवादेषु प्रसिद्धम् । तथा च भगवान् हारीतः स्मरति— 'छन्दःसु पादाक्षरसमुदायवदब्दसमूह उपनयने' इति । सृष्टिश्च छन्दसा सह तैत्तिरीये सप्तमकाण्डे समाम्नायते— 'प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवता अन्वसृज्यत गायत्री छन्दो रथंतरं साम ब्राह्मणो मनुष्याणाम्' इत्यादिका । 'अष्टाक्षरा गायत्री' इति श्रुतिवचनेन हारीतवचनमनुसृत्य गर्भाष्टमं वयो ब्राह्मणानामुपनयने कालः संपद्यते । विवाहश्च

स्त्रीणामुपनयनस्थाने विहित इति, तासामपि अष्टमं वय एवोद्वाहे कालो भवितुमर्हति । स्मृतावपि— 'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः । पतिसेवा गुरौ वासः गृहार्थोऽग्निपरिक्रिया ॥' इति मनुरब्रवीत् । 'वैदिकोऽयं संस्कारः उपनयनाख्य एव' इति श्रीमान् कुल्लूकभट्टो व्याचख्यौ । व्याघ्रपादश्च— 'स्त्रीणामुपनयस्थाने विवाहं मनुरब्रवीत्' इत्याह । अतोऽवगच्छामः गर्भाष्टमं वा जन्मतो वाष्टमं वयः स्त्रीणां विवाहकाल इति । तथा गौणोऽपि कालः स्त्रीणां रजोदर्शनात्प्रागेवेति श्रुतावेव तैत्तिरीयाणां खिलेष्वितिहासे श्रूयते— 'पितृगृहेषु या कन्या रजः पश्यत्यसंस्कृता । सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः' इति । वृषलीपतेस्तु निन्दापि श्रूयते तत्रैव— 'वृषलीपतिभुक्तानि श्राद्धानि च हवींषि च । पितरो न प्रतिगृह्णन्ति दाता स्वर्गं न गच्छति' इति; 'पक्षैस्तु कुक्कुटो हन्ति निघर्षेण च सूकरः । आगतं गतयाश्वानश्चक्षुषा वृषलीपतिः ।' इति च । स्मृतिवचनान्यत्र विषये परस्तादुदाहरिष्यामः । तदेवं निन्दाश्रुतेः रजसोऽनन्तरं विवाहः प्रतिषिध्यत इति गम्यते ।

कथं पुनर्निन्दावचनैः रजसोऽनन्तरं विवाहः प्रति-

षिध्येत; यत्कारणं मुख्यकालप्रशंसामेव तानि वचनानि गमयन्ति; अन्यथा नहिनिन्दान्यायविरोधः प्रसज्येत ॥ अत्र ब्रूमः— नात्र नहिनिन्दान्यायः प्रसज्यते; परामर्शाधिकरणन्यायविरोधात् । तत्र हि ब्रह्ममीमांसायाम् 'ब्रह्मसंस्थोऽमृतत्वमेति' इति वचनं 'विध्यन्तरस्यादर्शनात् विस्पष्टाच्चाश्रमान्तरप्रत्ययाद्गुणवादकल्पनयैकवाक्यत्वयोजनानुपपत्तेः' पारिव्राज्यमेवापूर्वत्वाद्विधातुमर्हति इति निर्णीतम् । एवमिहापि वृषलीत्वं वृषलीपतित्वं निन्दा चेति त्रितयमपूर्वं श्रूयमाणम्, अपूर्वमेव कमप्यर्थं विधातुमर्हतीति रजसोऽनन्तरं विवाहस्य प्रतिषेधं विधायैवोपशाम्यति । अपि चात्र श्रूयमाणा निन्दा नेतरप्रशंसायै स्यात्, तस्याः विवाहप्रकरणानन्तःपातित्वात् । अतः नहिनिन्दान्यायस्यात्राप्रवृत्तेः परामर्शाधिकरणन्यायेन प्रतिषेधविधिमेव निन्दावचनेभ्यः अभ्युपगन्तुं प्रभवामः । सर्वमिदमभिप्रेत्यैवाह भगवान् मनुः— 'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः । नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः' इति । अत्र कन्यास्वेव बालिकास्वेवेत्यर्थः, तत्र तत्पदरूढेः; तस्मात् बालिकास्वेव विवाहमन्त्राःसंगच्छन्ते, न पुनर्युवतिषु इति वदन् मनुः ऋतुमतीविवाहं प्रतिषेधतीति स्पष्टमवगम्यते ।

अत्रापरे प्रत्यवतिष्ठन्ते । नानेन वचनेनर्तुमतीविवाहं प्रतिषेधतीति अभ्युपगन्तुं प्रभवामः । कन्याशब्दो हि विवाहरहितामेव केवलं स्त्रियमाचष्टे । तथा चाह श्रीमान् माधवाचार्यः— 'लोकप्रसिद्धस्तु कन्याशब्दो विवाहरहितस्त्रीमात्रमाचष्टे' इति । नन्वेवम् 'ननु ऋतुमत्यां कन्याशब्दः कथं प्रयुक्तः' इति माधवाचार्याणामेव शंकाग्रन्थो नोपपद्यते । नैष दोषः; पूर्व पक्षोक्तिर्ह्येषा, न पुनः सिद्धान्तवचनम् । अत एवानन्तरं शास्त्रेषु विविधार्थेषु प्रयुज्यते कन्याशब्दः, तेषामविरोधाय कन्याशब्दः विवाहरहितस्त्रीमात्रमाचष्टे इत्यभ्युपगन्तव्यमिति माधवाचार्या अब्रुवन् । एतेनायं शब्दः बालिकास्वेव रूढ इति परास्तम् । अत एव भगवान् पतञ्जलिः— 'या चेदानीं प्रागभिसंबन्धात् पुंसा सह संप्रयोगं गच्छति तस्यां कन्यांशब्दो वर्तत एव' इत्यब्रवीत् 'कन्यायाः कनीन च' इत्यत्र । आचार्योऽपि कैयटः एवमेव प्राह । तस्माद्विवाहितायामेव कन्याशब्दः प्रयुज्यत इति शास्त्रविदां मर्यादा । अत एव 'असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे' इति, 'ऋतुस्नाता तु या शुद्धा सा कन्येत्यभिधीयते' इत्यादिशल्यपर्वोमामहेश्वरसंवादादिवचनजातं संगच्छते । तस्मात् विवाहरहितस्त्रीमात्रे कन्याशब्दं प्रायुङ्क भगवान्

मनुरित्यकामेनाप्यभ्युपगन्तव्यमिति ॥

अत्राभिधीयते— नायं कन्याशब्दः सामान्येन प्रयुज्यमानः ऋतुमतीमपि गमयितुमीष्टे; बालिकास्वेव तत्पदरूढेः। अत एवाहामरसिंहः— 'कन्या कुमारी गौरी तु नग्निका नागतार्तवा' इति । अत्र गौर्यादयस्त्रयः शब्दाः अनागतार्तवां ब्रुवन्तीति रामाश्रमिणां व्याख्या । अतस्तत्पूर्वं श्रूयमाणौ द्वावपि कन्याकुमारीशब्दौ बालिकामेव ब्रूत इत्यङ्गीकर्तव्यम् । अत एव तुशब्देन गौर्यादिशब्दत्रयात् व्यवच्छिनत्ति; उत्तरत्र क्रमप्राप्तान्युवतिवाचकाञ्शब्दांश्च अनुक्रामत्यमरः 'स्यान्मध्यमा दृष्टरजाः' इति । असति बाधके रूढ्यर्थस्य परित्यागस्त्वन्याय्य इति बालिकामेवाभिप्रेत्य कन्याशब्दं प्रायुङ्क्त भगवान्मनुरिति श्लिष्यते । ननु विवाहरहितायामेव कन्याशब्दः रूढ इति माधवाचार्या अब्रुवन्नित्यवोचाम; बाढम्, प्रौढ्या अभ्युपगतं तैरिति ब्रूमः। कथम्? 'कन्या ते प्रासूत सुतम्' इत्यादिलौकिकव्यवहारविरोधात् । न चात्रापि कन्याशब्दः अविवाहितां स्त्रियमाचष्ट इत्यमूढोऽध्यवस्यति; 'कन्या ते प्रासूत सुतम्' इति परेणोच्यमानं श्रुत्वा कश्चित्पिता प्रमोदमधिगच्छति । यद्यविवाहिता ह्यात्मीया दुहिता सुतमसूत इति शृणोति,

विषादमेवायं गच्छतीति प्रसिद्धं लोके। तस्मादभियुक्तैरात्मीयासु दुहितृषु दुहितृकल्पासु वा कन्याशब्दः लोके प्रयुज्यत इत्येवाङ्गीकर्तव्यम् । एवं हि 'असंस्कृतायाः कन्यायाः' इत्यादिबहुवचनानि संगच्छन्तेतराम् । अपि च 'ऋतुस्नाता तु या शुद्धा सा कन्येत्यभिधीयते' इत्यत्र कन्याशब्दः कथमविवाहितामाचष्ट इत्यवेदीः । विवाहितास्वपीयं परिभाषा संगच्छते । न च शुद्धेत्यनेनाविवाहितेति वक्तव्यम्, प्रमाणाभावात् । माधवाचार्यास्तु ऋतुमत्यां कन्याशब्दः न संगच्छतइति विवदमानं पूर्वपक्षिणं प्रति नायमेकान्तः यद्बालिकायामेव कन्याशब्दः प्रयुज्यत इतीत्येव प्रतिपादयितुं प्रवृत्ताः प्रौढिवादेनाभ्युपगच्छन्तीति ब्रूमः । बालिकायां तु रूढोऽयं कन्याशब्दः अन्यत्रापि गौणतया प्रयुज्यते । यदपि महाभाष्योदाहरणम्, तदपि गौणतया अविवाहितासु वर्तत इति ब्रूमः । अत एव भाष्यव्याख्यानावसरे कैयटोऽपि— 'अन्ये त्वाहुः— मुनिदेवतामाहात्म्यात् या पुंयोगेऽप्यक्षतयोनिर्भवति' इत्युक्त्वा तत्र कुन्तीचरितमुदाजहार । अक्षतयोनिः अप्राप्तरजस्का एव भवितुमर्हति, न पुनरस्पृष्टमैथुना । 'या पुंयोगेऽप्यक्षतयोनिः' इति विरोधात् । यदि पुंयोगः कथमस्पृष्टमैथुना स्यात्; तस्मा-

दक्षतयोनिं अप्राप्तरजस्कामेवाभिप्रैति कैयट इत्यभ्युपगच्छामः। अपि चोदाहरणे कुन्तीचरितं निर्दिशति । तच्चैवं श्रूयते महाभारते— 'संत्यज्य भयमेवेह क्रियतां संगमो मम (आदिपर्व)' इत्यब्रवीत् भगवानादित्यः । प्रतिवचनमपि तस्याः वैशंपायन एवमाह— 'सा तु नैच्छत् वरारोहा कन्याहमिति भारत' (आदिपर्व) इति । कथमत्र कन्याशब्दस्याविवाहितेत्यर्थः संगच्छेत । न हि विवाहिता अन्येन संगता न प्रत्यवैतीत्यभ्युपगन्तुं प्रभवामः; प्रमाणविरोधात् । अविवाहिता च प्रथममादित्येनोढा न कस्याप्युपहासास्पदं गच्छति । अपि च 'क्रियतां संगमो मम' इति वदन्तमादित्यं 'कन्याहं' इति प्रत्यब्रवीत् । तच्च नाहमुपभोगयोग्यास्मीत्येवार्थेऽभ्युपगते संगच्छते । अपि चोपरिष्टात् यथापुरं तव कन्यात्वं प्रापयामीति प्रलोभ्य तामुपभुक्तवानिति श्रूयते । तच्च कथं भवत्पक्षमनुकूलयेत् । अविवाहितां त्वां करोमीत्यर्थकल्पनमसमञ्जसमेव स्यात् । तस्मादत्र भारते श्रूयमाणः कन्याशब्दः ऋतोः प्राचीने वयसि वर्तमानामेव स्त्रियं सम्यगाचष्ट इत्यभ्युपगन्तव्यम् । अमुमर्थमुदाहरन् कैयटोऽपि अक्षतयोनिशब्देनर्तोः प्राचीने वयसि स्थितामेवाभिप्रैतीत्यङ्गीकर्तव्यम् । ननु साहसमेतत्; मेधातिथि-

प्रभृतिभिरक्षतयोनिरस्पृष्टमैथुनेति व्याख्यातत्वात् । नैष दोषः । नावश्यंमेधातिथिव्याख्यानेनास्पृष्टमैथुनेत्यर्थः संपद्यते । 'अक्षतयोनिग्रहणं पुनर्विवाहेन पत्नीत्वमाशङ्कमानं निवर्तयति, सहोढजकानीनमातृणां च' इत्येव सोऽब्रवीत्। स्पष्टमनेनाक्षतयोनिशब्दं परिभाषां मन्यते मेधातिथिराचार्य इत्युत्पश्यामः । द्वित्राणि व्याख्यानानि मुक्त्वा अन्यत्र स्पष्टतया अस्पृष्टमैथुनेत्यर्थवर्णनस्यादृष्टत्वात् । अस्तु वा तथा वर्णनं सर्वत्र, तथापि तादृशोऽर्थो गौण इति ब्रूमः । अक्षतयोनिशब्दस्तु शक्त्याऽप्राप्तरजस्कायामेव वर्तते । क्षते हि शरीरे शोणितनिर्गमो दृष्ट इति शोणितप्रसृतिलक्षणेन क्षतयोनिशब्दस्य प्रवृत्तेः । तदभावेनाक्षतयोनिः स्त्री भवतीति क्वचिद्वयोविशेषावस्थायां नियम्यते शास्त्रेषु । एतेन वृद्धायामपि कदाचिदक्षयोनिशब्दः प्रसज्येतेति मन्दशंकापि परास्ता । क्षतयोनेः प्रायेण पुरुषसंपर्को भवतीति क्षतयोनिः स्पृष्टमैथुना, अक्षतयोनिः पुनरस्पृष्टमैथुनेत्यर्थकल्पनं व्याख्यानेषूपलभ्यमानं गौणमेव भवितुमर्हति । तस्मादप्राप्तरजस्का भवत्यक्षतयोनिरित्यत्र न कापि क्षतिः । सर्वथापि तु कन्याशब्दः अप्राप्तरजस्कायामेव मुख्यतया वर्तते, गौणतया त्वन्यत्रेति अवश्यमङ्गीकर्तव्यम् । पराक्रान्तं चैतत्सूरिभिर्व-

योनिर्णये । आस्तां तावदिदम् । अनुसरामः प्रकृतम् । किमभिप्रेत्य कन्याशब्दं प्रायुङ्क्त भगवान्मनुरिति विचारयामः । बालिकामप्राप्तरजस्कामेव मनुरभिप्रैतीति ब्रूमः । तथा हि— यदि कन्याशब्दस्याविवाहितेत्यर्थः गृह्येत 'नाकन्यासु क्वचिन्नृणाम्' इति वाक्यशेषो नोपपद्येत । अकन्यासु विवाहितासु पाणिग्रहणिका मन्त्राः प्रतितिष्ठन्ति वा न वेति शङ्काया एवानुदयात् अन्याय्यत्वाच्च तादृशशङ्कायाः । व्यर्थमेव स्यादिदं वचनं भवदीयार्थस्याङ्गीकारे । गान्धर्वविवाहे मन्त्रतः पुनर्विधानं शास्त्रेषु दृष्टमिति न तन्निवारणायेदं वचनमिति प्रत्यवस्थातव्यम् । तस्मादविवाहितां स्त्रियं द्वेधा विभज्य कासांचिन्मन्त्राः प्रतितिष्ठन्ति अन्यासां तु न सन्तीत्यर्थं मनसि निधाय 'कन्या' 'अकन्या' इति शब्दद्वयं प्रयुङ्क्ते । अविवाहिता पुनर्नार्यप्राप्तरजस्का प्राप्तरजस्का चेति द्विधैव भवितुमर्हति । नन्वप्राप्तरजस्का भवत्यकन्या प्राप्तरजस्का तु कन्येति कल्पयामः । नैतन्न्याय्यम्, प्रमाणाभावात् विरोधाच्च । पराक्रान्तं चैतत्प्रथममेवामरविचारे । तस्मादकन्या प्राप्तरजस्कैव भवितुमर्हति । अपि चेदं वचनमष्टमाध्याये दण्डप्रकरणे श्रूयते । तत्र पूर्वं 'अकन्येति तु यः कन्यां ब्रूयात् द्वेषेण मानवः । स शतं प्राप्नु-

याद्दण्डं तस्या दोषमदर्शयन् । (मनु ८१ २२५)' इत्याह । अत्र कुल्लूकः 'नेयं कन्या क्षतयोनिरियमिति यो मनुष्यो द्वेषेण ब्रूयात्' इति व्याचख्यौ । अनन्तरम् 'युक्तश्चास्या-कन्येतिवादिनो दण्डः, यस्मात् इति 'पाणिग्रहणिका' इति श्लोकमवतारयति । नचात्र पूर्वश्लोके अकन्या कन्याभिन्ना विवाहितेत्यर्थः संगच्छते 'क्षतयोनिरियम्' इति व्याख्या-विरोधात् । न हि क्षतयोनिर्नाम विवाहितेति क्वापि उभाभ्या-मप्यावाभ्यामभ्युपगतम् ; क्षतयोनिः स्पृष्टमैथुनेति भवताभ्यु-पगतत्वात्, अन्तरेणापि विवाहं स्पृष्टमैथुनायां क्वचिच्छास्त्रेषु कन्याशब्दस्य प्रयुक्तत्वाच्च । कथमत्र सा अकन्या भवितुम-र्हति । अथाकन्या कन्याभिन्ना स्पृष्टमैथुनेत्यभ्युपगच्छसि प्र-तिज्ञाविरोधस्ते प्रसज्येत, अस्पृष्टमैथुनायामेव कन्याशब्दस्य नियमेन भवता अनभ्युपगतत्वात्। अथेदानीमेवमङ्गीकरोमीति ब्रूषे, स्पृष्टमैथुनायामप्ययं शब्दो वर्तत एवेति महाभाष्यवचनं प्रतिकूलमेव स्यात् भवताम् । तस्मादन्यथानुपपद्यमानमिदम-कन्यापदं कुल्लूकभट्टरीत्या प्राप्तरजस्कामेव लक्षयति । क्षतयो-निश्च प्राप्तरजस्कैवेत्यपि कुल्लूकस्याभिप्राय इत्यप्यङ्गीकर्तव्य-म् । तस्मात् 'अकन्येति तु यः कन्याम्' इत्यत्राकन्यापदमृ-तुमतीमेव ब्रूयात् । अपि चोत्तरश्लोके 'लुप्तधर्मक्रिया हि ताः'

इति वाक्यशेषः कथमुपपद्येत यद्यकन्या नाम विवाहिता स्यात् । ननु सा स्पृष्टमैथुना स्यात्; एवं हि लुप्तधर्मक्रिया-भवितुमर्हति । न; विवाहात् स्पृष्टमैथुनायां धर्मलोपाभावात् । अथमतमन्तरेण विवाहं स्पृष्टमैथुना अकन्येति, तदपि न संङ्ग-च्छते । स्पृष्टमैथुनायामपि तादृश्यां कन्याशब्दः वर्तत एवे-त्यधस्तात् प्रपञ्चितत्वात् । तस्मादस्मदुक्त एवार्थः परि-ग्राह्यः । अकन्या हि प्राप्तरजस्का लुप्तधर्मक्रिया भवति, अतः अप्राप्तरजस्कामतथाभूतेयमिति दूषयन् तस्याः विवाहसंस्का-रं प्रतिषिध्य श्रेयोद्वारमेव बाधत इत्यवश्यमसौ पुरुषो दण्ड-मर्हतीत्येव सुतरां प्रतिपादयति मनुरिति अकामेनाप्य-भ्युपगन्तव्यम् । तस्मात् सिद्धमृतुमतीविवाहः शास्त्रतः प्रतिषिध्यते, कन्याया एवर्तोःप्राचीने वयसि वर्तमाना-या विवाहो विधीयत इति च । पराक्रान्तं चात्र परेषां मतं बहुधा प्राचीनैः । तथापि केचिन्न्यायाभासयुक्त्याभासवा-क्याभासावष्टम्भाः शास्त्राणामन्यथाभावं वर्णयन्तोऽपार्थक-ल्पनेन सर्वमपि लोकमाकुलीकुर्वन्ति । तत्र वैदिकमार्गे बद्ध-श्रद्धैस्तत्परिरक्षणं यथाशक्ति कर्तव्यमिति न्यायमेकमेवावल-म्ब्य अख्यानर्थहेतोः प्रहाणाय सम्यगर्थनिर्धारणाय च प्रवृ-त्ताः तेषां यद्व्याख्यानं तद्व्याख्यानाभासं न सम्यग्व्याख्यान-

मित्यस्यां परिणयमीमांसायां प्रदर्शयिष्यामः ॥

तत्र तावत् वैवाहिकमन्त्रास्तात्पर्यतो विचार्यमाणाः रजस्वलोद्वाहमेवोपस्थापयन्तीति पूर्वपक्षी प्रत्यवतिष्ठते । तथा हि— अघोरचक्षुः' इत्यादिमन्त्रे वध्वाः सौमनस्यादिकमभिधीयते । तच्च वध्वाः युवतिभावमेव गमयति, अतथाभूतायां सौमनस्यादिकामनाया असंभवात् । तथा 'जीवाँरुदन्तिविमयन्ते' इति मन्त्रे स्पष्टमेवालिङ्गनमुच्यते । तदपि युवतिभावमेवोपोद्बलयति । 'शं ते हिरण्यम्' इत्यादिमन्त्रे 'मया पत्या तन्वंसंसृजस्व' इत्यत्र पतिशरीरसंसर्ग उच्यमानः दृढमेवर्तुमत्या एव विवाहं गमयति । 'सखा सप्तपदा भव' इति मन्त्रे ऋक्सामद्युपृथिव्यादिदृष्टान्तपूर्वकमत्यन्तकामिनोर्यूनोर्नर्मसंलापवत्परस्परसख्यं स्त्रियं प्रति बहुप्रपञ्चमभिधीयते वरेण । किमितोप्यन्यद्वैवाहणीयं वध्वाः युवतिभावं व्यवस्थापयितुम् । एवमन्यान्यपि यथासंभवं मन्त्रलिङ्गानि द्रष्टव्यानि । ननु स्मृतिषु स्पष्टमेव निषिध्यते रजस्वलाविवाहः । बाढम्, तथापि पौरुषेयस्मृत्यपेक्षया मन्त्रलिङ्गान्येव बलवन्ति भवन्ति अपौरुषेयत्वात् । अतः 'विरोधे त्वनपेक्षम्' इति न्यायेन वैदिकलिङ्गप्राबल्यमङ्गीकृत्यर्तुमतीविवाह एव शास्त्रीय इत्येवं प्राप्ते,

ब्रूमः; नर्तुमतीविवाहः शास्त्रीय इति । कस्मात्? स्मृतिषु निषिद्धत्वात्; नन्वस्ति मन्त्रलिङ्गमित्यवोचाम; बाढमवोचः, नैतन्न्याय्यं पश्यामः, लिङ्गाभावात् । सामर्थ्यलक्षणं हि लिङ्गम्, न पुनर्यत्किंचिच्छब्दश्रवणम् । तथा चावोचन् सर्वतन्त्रस्वतन्त्राः श्रीमन्तो वाचस्पतिमिश्राः भामत्याम्—'अस्त्यैन्द्री ऋगित्यारभ्य, 'अत्र हि सामर्थ्यलक्षणालिङ्गादिन्द्रे विनियोगः प्रतिभाति' इति 'वेधाद्यर्थभेदात्' (ब्र. ३. ३. १५.) इत्यधिकरणे । 'कदाचन स्तरीरसि' इत्यादिमन्त्रे मघवेन्द्रशब्दाभ्यामिन्द्रएव विनियोगः गम्यते । तथा 'इमं मे वरुणश्रुधीहवम्' इत्यत्रापि वरुण एवोपस्थेय इति । एवमिहापि सामर्थ्यलक्षणमृतुमतीबोधकं लिङ्गं नोपलभामहे । न हि सौमनस्यादिकं युवतिमेवाव्यभिचरितसंबन्धेनोपस्थापयेत् जुह्वादिवत्; बालिकास्वपि संभवात् । आलिङ्गनमपि श्रूयमाणं नर्तुमतीमुपस्थापयति । नैतदालिङ्गनं संभोगाय, अपि तु वियोगमसहमानान्बन्धुजनान्प्रति सादरमिमां परिगृह्णामि परिपालयामि च, मा विषादं गच्छन्तु भवन्त इति बोधयितुमेव । अपि चायं मन्त्रस्तत्वतो विचार्यमाणः नालिङ्गनं विधत्ते । 'ये बन्धुजना बध्वाः परिष्वङ्गाय पर्याप्तं विवाहं प्रवर्तितवन्तस्ते मा

रुदन्तु' इत्येव मन्त्रार्थो भवति । तस्मान्नैतल्लिङ्गं भवितुमर्हति । 'शं ते हिरण्यम्' इत्यत्रापि श्रूयमाणः वध्वाः पतिशरीरसंसर्गः न तात्कालिकं वध्वाः युवतिभावं गमयति, संभोगकाले संसर्गस्य तत्र विवक्षितत्वात् । ननु संनिहित एव काले चतुर्थदिने समावेशनस्य विधानादत्रर्तुमतीत्वमवश्यमभ्युपगन्तव्यमिति यद्युच्येत, तर्हि तदेवात्रलिङ्गमिति पूर्वपक्षः कर्तव्यः, नत्वनेन मन्त्रेणेत्यागतम् । उपरिष्टाच्चोन्मथिष्यामश्चतुर्थीसमावेशनमतम् । तस्मान्नानेन मन्त्रेणर्तुमतीविवाहः सिध्यति ॥ 'सखा सप्तपदा' इति मन्त्रे नर्मवचनेन स्त्रीपुंसोः सख्यमेव अविच्छिन्नं कीर्त्यते न पुनर्युवतिभावोऽपि; 'रेतोभृत्त्वम्', 'सामाहमस्मि', 'वाक् त्वम्', इत्यादिषु स्त्रीलिङ्गपदैः स्त्रीत्वमेव वध्वाः अभिधीयते, कथमेतावता ऋतुमतीत्वमपि तस्याः अवगम्येत; शब्दानां तादृशार्थबोधने सामर्थ्याभावात् । तस्मात् नानेनापि मन्त्रेणर्तुमतीविवाहः शास्त्रीयः संपद्यते ॥

स्यादेतत् । अस्ति चायमपरो मन्त्रः, यः स्पष्टमेवर्तुमतीविवाहमुपक्षिपति 'सोमः प्रथमो विवदे' इत्यादिकः । तत्र हि 'तुरीयस्ते मनुष्यजाः' इति श्रूयते; तत्पूर्वमग्निः पतिरिति च । अग्नेः पतित्वं तु रजःप्रादुर्भावकाल एव, 'रजस्यग्निः

प्रतिष्ठितः' इति स्मृतिवचनात् । तस्माद्रजसोऽनन्तरं स्त्रीणां विवाहः शास्त्रीयो भवतीति । एवं प्राप्ते, ब्रूमः— नानेन मन्त्रेणर्तुमतीविवाहो गम्यते । अत्र हि सोमगन्धर्वादीनां पतित्वमेव केवलं श्रूयते न पुना ऋतुमतीत्वमपि वध्वाः । ननूक्तम् 'रजस्यग्निः प्रतिष्ठितः' इति स्मृतिवचनमस्तीति ; सत्यम्, तथापि स्मृत्यानुगृहीतोऽयमृतुमतीविवाह इति हि वक्तव्यम्, न तु श्रौतं लिङ्गमस्तीति । कथं पुनरेवमुच्यते । न वयं सर्वथा स्मृतिमनादृत्य श्रुतिमेकामेव प्रमाणीकुर्मः ; यथासंभवं स्मृत्यनुसारेणापि श्रुत्यर्थः परिग्राह्यः इत्येवातिष्ठामहे । तस्मात् अस्ति श्रौतं लिङ्गमिति चेत्, तर्हि श्रौतलिङ्गस्य प्राबल्यं कथमेकान्तेन भवताऽभ्युपगन्तुं शक्यते । स्मृतिमप्यनुसरति श्रुतिरिति आः कष्टमसंमतोऽयं पन्थाः शिष्टानामिति हि त्वदीया ब्रूयुः । तस्मान्नात्र श्रौतं लिङ्गं पश्यामः । अथापि भवतः श्रद्धामनुरुद्ध्य स्मृतिमभ्युपगच्छामः श्रौतलिङ्गप्रसिद्धयै, एवमपि न दोषाद्विनिर्मोक्षः । तथा हि, समानप्रकरणे संवर्तस्मृतौ सोमगन्धर्वादीनां कालमभिधायैवं वाक्यशेषः श्रूयते— 'तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्' इति । अत्र यावदृतुमती भवेत् तावन्नोद्वाहयेत् इत्यर्थकल्पनमनवबोधविजृम्भितमेव स्यात् ; यथाश्रुतिगृहीतार्थभङ्गप्रसङ्गात् । न च पूर्व

वाक्यस्यार्थवत्तासिद्ध्यै एवमस्यार्थवर्णनं न्याय्यमिति प्रत्यवस्थातव्यम् । कन्याप्रदानकालस्योपक्रमेऽनवगतत्वात् । न चासति बाधके यथाश्रुतिगृहीतार्थभङ्गः कर्तव्य इति निरूपितं शास्त्रदीपिकायां पर्णमय्यधिकरणे । तस्मान्न सर्वात्मनानेन मन्त्रेणर्तुमतीविवाहः सिध्यति । पराक्रान्तं चात्र निपुणतरं सूरिभिर्वयोनिर्णये । तस्मान्नर्तुमतीविवाहः शास्त्रीय इति ॥

एवं परिहृतेप्यस्मिन्मन्त्रे पुनरन्यस्मान्मन्त्रात्पूर्वपक्षी प्रत्यवतिष्ठते । 'उप मामुच्चा युवतिर्भूयाः' इति मिथः समीक्षणे विनियुज्यते । अस्याऽयमर्थः— 'हे युवतिः संभोगकाले उपरि सन्तं मामनुभूयाः' इति । न चात्र वध्वाः अभ्यनुज्ञैव दीयते इति वक्तव्यम् । सामर्थ्यलक्षणमप्यस्ति लिङ्गं वध्वाः ऋतुमतीत्वबोधकम् 'युवतिः' इति संबोधनश्रवणात् । युवतिशब्दस्तु प्राप्तरजस्कायामेव रूढः ।' ननु उपक्रमे तावल्लाजहोममन्त्रः एवं श्रूयते— 'अर्यमणं नु देवं कन्या अग्निमयक्षत' इति । कन्याशब्दस्यात्र श्रवणात्तस्य चाप्राप्तरजस्कायामेव रूढत्वात् उपक्रमाधिकरणन्यायेनोपरि गतो युवतिशब्द एव तदनुरोधेन नेतव्य इति । नेति ब्रूमः । कथम् ? युवतिपक्षोपोद्बलकानि बहूनि लिङ्गानि दृश्यन्ते । पूर्वम् 'अपश्यं

त्वा मनसा दीध्यानां (दीप्यमानां ध्यायन्तीं वा) स्वायां तनूमृत्वियेनाथमानाम् ' इति श्रूयते । अत्र गर्भं प्रार्थयमानामित्यर्थः । उत्तरत्रापि ' प्रजापते तन्वं मे जुषस्व ' इत्यादिकः पठ्यते । तत्र ' या न ऊरू उशती विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ' इति स्पष्टमेव मैथुनाय प्रार्थना दृश्यते । सर्वमिदं युवतिशब्दार्थमेवोपोद्बलयति । ननु जपे खलु ' प्रजापते ' इत्यादेर्विनियोगः । अपि च प्रार्थना खल्वेषा । सा चानृतुमत्यामपि कालान्तरे संभाव्येत । नेति ब्रूमः । यद्यपि विनियोगो भवति जपे तथापि स्वनिमित्ताश्रयाद्यर्थप्रकाशकत्वमपि संभवति मन्त्रस्येति निरूपितमस्मदीयैरभियुक्तैः विमर्शे । अत एव ' क्षीरिणामन्येषां वा लक्ष्मण्यानां वृक्षाणां नदीनां धन्वनां च व्यतिक्रमे उत्तरे यथालिङ्गं जपति ' (आ. गृ. ६–५.) इत्यत्रवीदापस्तम्बः । अत एव ' तीर्थस्थाणुचतुष्पथव्यतिक्रमे चोत्तरां जपेत् ' (आ. गृ. ५. २६) इत्यत्र एवमेव व्याचख्यौ सदुर्शनाचार्यः । तस्मादत्रापि जपे विनियुक्ते मन्त्रे ह्यस्त्येव लिङ्गं युवतिभावमुपोद्बलयत् । यद्यपि उपक्रमस्य प्राबल्यं, तथापि उपक्रमस्थमेकं लिङ्गमुपरितनानेकगुणविरोधे दुर्बलमिति प्रपञ्चितमुत्तरमीमांसायां दहराधिकरणे (ब्र. १. ३. १४).

तस्माद्हराधिकरणन्यायेनोपसंहारमनुसृत्यैवोपक्रमगतः कन्याशब्दः कथंचिन्नेय इति । एवं प्राप्ते ब्रूमः— नैतदेवमिति । न ह्युपसंहारे सन्ति बहूनि लिङ्गानि । न हि ऊरुशेफप्रभृतीनां शब्दानामेव श्रवणमात्रेणर्तुमतीत्वं वध्वाः अध्यवस्यन् भवति श्लाघनीयप्रज्ञः, कन्यास्वपि मन्त्रार्थस्य संभवात् ; प्रार्थनात्मकत्वात् च क्रियापदानाम् । यथाहुः— 'अनेनैव प्रार्थनेन विवाह्यामतथाविधाम् । अप्रौढां गमयन्ती सत्यनुगृह्णाति च स्मृतीः' इति । ननु मन्त्राणां स्वनिमित्ताश्रयार्थप्रकाशकत्वमप्यस्ति भगवतापस्तंबेन तथोक्तत्वादित्यवोचाम । बाढम् । तदसङ्गतमिति ब्रूमः । आपस्तंबेन तथा नोक्तत्वात् । तथा हि 'तीर्थस्थाणुचतुष्पथव्यतिक्रमे' इति सूत्रे श्रौतलिङ्गापेक्षया स्मार्तश्रुतेः प्राबल्यं प्रसाध्य विनियोगविध्यनुसारेण मन्त्रलिङ्गानि कथंचिन्नेयानि इति निरूप्य 'न्यायतस्तु जपमन्त्रो नार्थपरः' इत्यन्ततो न्यरूपयच्छ्रीमान सुदर्शनाचार्यः । 'क्षीरिणाम्' इत्यत्र तु लिङ्गाद्विनियोगविधिमभ्युपगच्छति, न पुनर्लिङ्गादेव सर्वत्र विनियोगविधिरभ्युपगन्तव्य इति वा मन्त्रार्थानुसारेणैव विधेरप्यर्थोऽङ्गीकर्तव्य इति वा प्रतिपादयति, येन श्रीमतामभीष्टः सिध्यति । अपि च 'न्यायतस्तु जपमन्त्रो नार्थपरः' इति

बदन् सुदर्शनाचार्यः विध्यनुसारेणार्थवत्त्वं मन्त्राणामभ्युपगच्छति न पुनर्विपरीतम् । तस्मात् 'प्रजापते तन्वं मे' इति मन्त्राणां जपे विनियुक्तत्वात् न तात्कालिकीं प्रौढावस्थां ते बोधयेयुः, कन्यास्वपि कालान्तरे संभवात् । तस्मान्नैतान्युपोद्बलकानि भवन्ति लिङ्गानि । अतः उपसंहारे बहुलिङ्गप्रतिज्ञा मृषैव भवतीति उत्सर्गप्राप्तमुपक्रमप्राबल्यमङ्गीकृत्यैव युवतिशब्दः सामान्यतः स्त्रीवाचक इति नेतव्यः । अपि चोपक्रमे 'कन्यलापितृभ्योयती' इत्यत्रापि कन्याशब्दो दृश्यते । तस्मान्नानेन मन्त्रेणर्तुमतीविवाहः सिध्यति । एतेनेतरे मन्त्रा व्याख्याता वेदितव्याः । अत एव सर्वज्ञशिखामणिर्भगवान्मनुः 'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः' इत्यब्रवीत् । तस्मान्नास्ति कापि मन्त्रलिङ्गं यद्बलेनर्तुमतीविवाहः शास्त्रीयः स्यादिति सिद्धम् ॥

अवसितः श्रुत्यर्थविचारः । इदानीं गृह्यसूत्राणि विचारयामः । तत्र तावद्भगवानापस्तम्बः 'शेषं समावेशने जपेत्' इत्याह । किमनेन सूत्रेण भगवान् चतुर्थदिने समावेशनं विदधात्याहोस्विन्नेति वादिविप्रतिपत्तिदर्शनात् विचारयामः । किं तावत्प्राप्तम्, विदधातीति; कस्मात्? प्रमाणोपलम्भात् । तथाहि— 'तं चतुर्थ्यांपररात्र' इत्यारभ्य संस्कारजातं वि-

धायेदं पठति 'शेषं समावेशने जपेत्' इति । तस्मादुत्पश्यामः चतुर्थ्यां विधीयते समावेशनमिति । ननु 'समावेशने' इत्येव पठ्यते । तथा च तस्मिन्काले जपेत् इति फलति । समावेशनं तु किं केन कथमित्यादिकं नात्रोपलभ्यत इति चेत्, न; उत्तरत्र 'रजसः प्रादुर्भावात् स्नातामृतुसमावेशने' इति श्रुतात् ऋतुलिङ्गात् समावेशनं नाम वध्वा सह मैथुनार्थं शयनमिति सुदर्शनाचार्येण व्याख्यातत्वात् । तर्हि उपरिनिर्दिश्यमानमेवर्तुसमावेशनमत्रापि प्रत्यभिज्ञाप्यते शब्दैक्यादिति तदनुवादेन जप एव केवलमत्र विधीयते इति अभ्युपगच्छामः । नैवं शक्यतेऽभ्युपगन्तुं, तत्रर्तुसमावेशनस्य विधानाभावात् । नन्वत्रापि विधिं नोपलभामहे । बाढम् । 'अनुपलभमाना अपि त्वनुमास्यामहे सन्निधिसामर्थ्यात् । 'तं चतुर्थ्यांपरारात्रमुत्थाप्य' इत्यादिकर्मजातं विधाय हि प्रकरणे तस्मिन्निदं पठ्यते 'शेषं समावेशने जपेत्' इति । तद्धि समावेशनकर्मकालं कमप्यपेक्षते; अपेक्षितं च कालं प्रकरणं समर्पयति । तस्माद्यथा 'समिधो यजति' 'तनूनपातं यजति' इत्यादीनि प्रयाजादीनि कर्माणि दर्शपूर्णमासप्रकरणे पठितानि तयोरङ्गभावं प्रतिपद्यन्ते । एवं समावेशनकर्मापि शेषहोमप्रकरणे

पठितं सदस्याङ्गभावं प्रतिपद्य चतुर्थदिनापररात्र एवात्मानं लभते । ननु 'समावेशने' समावेशनकाले इत्येव तस्यार्थः, तथा व्याख्यातत्वात् सुदर्शनाचार्येण; न पुनः समावेशनकर्मणीति । नैष दोषः । कालार्थपरिग्रहेऽपि सोऽयं कालः कदेति शंकायां प्रकरणबलेन चतुर्थदिनस्यैवाक्षिप्यमाणत्वात् । तर्हि ऋतुसमावेशनं नास्तीत्यागच्छेत् । न । तत्रापि विधेः कल्पनीयत्वात् । तर्हि कर्मभेदः स्यात्; तच्चायुक्तमभ्युपगन्तुं शब्दैक्येनैककर्मत्वाध्यवसायादित्यवोचाम । न । शब्दैक्याभावेन प्रत्यभिज्ञाभावात् । अत्र हि 'समावेशने' इति पठ्यते, तत्र तु 'ऋतुसमावेशने' इति । कथमनयोरैक्यं स्यात् । तस्मात् कर्मभेदोऽभ्युपगन्तव्यः । अत एव सुदर्शनाचार्यः 'एतच्च रागप्राप्तसमावेशनाश्रितं विवाहकर्मार्थं क्रमजपयोर्विधानम्; यथा भोजनपर्यायव्रताश्रितं पयआदिविधानम्' इति ब्रुवन् सर्वनाम्नैतच्छब्देन रागप्राप्तमित्यनेन चेदं समावेशनमृतुसमावेशनादन्यत् रागतः प्राप्तत्वाच्च न विधानमर्हति चेति स्पष्टं न्यरूपयत् । ऋतुसमावेशनं तु नित्यमेव 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पतते नात्र संशयः', इति पत्नीगमनस्य नियमेन विधानात् । 'यथा भोजनपर्यायव्रताश्रितं पयआदिविधानमिति दृष्टा-

न्तोऽपि अस्मत्पक्षमेवानुकूलयति । तथा हि— दीक्षितस्य पयोविधानं भोजनपर्यायव्रताश्रितम्; भोजनं च रागप्राप्तम् । यदि रागो न स्यात् लुप्यत एव भोजनं तत्पर्यायं व्रतञ्च । तत्र पयआदेः प्रसक्तिरेव नास्ति । ततश्चात्र समावेशनमनियतमिति फलति । अनियतत्वाच्चेदं भिन्नमेव भवितुमर्हति, ऋतुसमावेशनस्य नियमेन विधानात् । अत एवोपरिष्टाच्च 'अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि कर्तव्यं स्यात् तदा पूर्वमारोहोरुमित्यादिजपः ततो विष्णुर्योनिमित्यादिजपः' इत्यब्रवीत् । यद्यत्र समावेशनमृतुसमावेशनमेव स्यात् तर्हि सुदर्शनवाक्ये ह्यपेः स्वारस्यमनादृतमेव स्यात् । अपि चर्तुसमावेशनमेवात्र यद्याश्रयतया विवक्ष्येत तर्हि 'रजसः प्रादुर्भावा' दिति सूत्रारंभो व्यर्थः स्यात् । तस्मादवश्यमत्र समावेशनद्वयमङ्गीकर्तव्यम् । ननु यदि चतुर्थदिने समावेशनमभ्युपगम्येत तस्य प्रयोजनं वक्तव्यम् । किमिदं दृष्टार्थं वोतादृष्टार्थमिति । यदि दृष्टार्थं तर्हि 'रजसः प्रादुर्भावात्' इत्यत्र विधीयमानमनर्थकं स्यात् । अथादृष्टार्थं तदपि न । प्रमाणाभावात् गौरवाच्च । नैष दोषः । अगतिका हीयं गतिः यदत्रादृष्टार्थं चतुर्थदिने समावेशनमभ्युपगच्छामः इति । अन्यथा पृथक्सूत्रारंभो

व्यर्थः स्यात् इत्यवोचाम । तस्मात् रागप्राप्तमिदं समावेशनं अनियतमपि अभ्युपगन्तव्यमेव । तस्मात् विधीयत एव चतुर्थदिनापररात्रे समावेशनमापस्तंबेन भगवतेति । एवं प्राप्ते ब्रूमः— नैतदेवमिति । कस्मात् । 'प्रमाणाभावात् तथा हि । 'तिस्रो जपित्वा शेषं समावेशने जपेत्' इति हि सूत्रं भवति । तत्र समावेशने समावेशनकाले जपेत् इति टीकाकारैः व्याख्यायते । सोऽयं कालः कदेति नानेन वचनेन ज्ञायते इत्यतएवोत्तरत्र वक्ष्यमाणं ऋतुपदसमभिव्याहारमादाय ऋतुसमावेशनकालमभिप्रैति सुदर्शनः इति स्पष्टं प्रेक्षावताम्। तादृशं समावेशनमनूद्य जपमात्रमेवात्र विधीयते इति च । कथमत्रानुवादो युज्येत । शब्दभेदात् कर्मभेदाध्यवसायादित्यवोचाम । बाढमवोचः । वाचारंभणमेवैतादित्युत्पश्यामः । शब्दैक्येन प्रत्यभिज्ञानसंभवात् । ननु कथं 'समावेशन' ऋतुसमावेशनशब्दितयोः कर्मणोरेकत्वं स्यात् । नैतत्सङ्गतम् । विभक्तिभेदाभेदौ हि शब्दभेदाभेदप्रतिपादकौ हेतू न पुनर्विशेषणसमभिव्याहारतदभावौ। अत एव 'सर्वत्र प्रसिद्धोपदेशात्' (ब्र. १. २. १.) इत्यधिकरणे 'शारीरस्यात्मनो य शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति तस्माद्विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनो-

ऽभिधायकः' इत्यब्रुवन् श्रीमन्तो भगवत्पूज्यपादाः 'शब्दविशेषात्' इत्यत्र । एवमिहापि 'समासवेशने' इति सप्तम्यन्तः पठ्यते । उत्तरत्र 'ऋतुसमावेशने' इति स एव सप्तम्यन्तः विशेषणविशिष्टः पठ्यते । तस्मात् सर्वप्रकारेण शब्दैक्यमपह्नोतुमशक्यम् । अतः उत्तरत्र वक्ष्यमाणमेवर्तुसमावेशनमत्र प्रत्यभिज्ञाप्यत इति अनयोरैक्यं अकामेनाप्यभ्युपगन्तव्यम् । तस्मादृतुसमावेशनमेवानूद्य जपमात्रमत्र विधीयत इत्युत्पश्यामः । यदुक्तं पृथक्सूत्रारंभो व्यर्थ इति, अत्र ब्रूमः । आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुम् । 'शेषं समावेशने जपेत्' इति वाक्यस्वारस्येनर्तुसमावेशनमेकमेव विधीयत इत्यवगच्छामः, न पुनरपूर्वमत्रापि समावेशनं किमपीति । नन्वनुमास्यामहे संनिधिसामर्थ्यादित्यवोचाम । बाढमवोचः, न युक्त्युपेतमवोचः । 'वेधाद्यर्थभेदात् (ब्र. ३. ३. २५.) इत्यधिकरणन्यायाविरोधात् । तत्र हि शारीरकमीमांसायां 'हृदयं प्रविध्य' इत्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च रहस्यपठितानामपि न सन्निधिबलेन विद्याशेषत्वं संभवति, श्रुतिलिङ्गादिभिः प्रबलप्रमाणैरन्यत्र विनियुक्तत्वात् इति प्रपञ्चितम् । एवमिहापि 'शेषं समावेशने जपेत्' इति समावेशनकर्मणि विनियुक्तस्य जपस्य

कालः समावेशनकाल एव भवितुमर्हति । न च कथं 'समावेशने' इति शब्दः सप्तम्यन्तः सकृदुत्पन्नः समावेशनकर्म ज्ञापयित्वा पुनः समावेशनकालमपि ज्ञापयितुमर्हतीति प्रत्यवस्थातव्यम् । दर्शपूर्णमासयोः तत्प्रख्यन्यायेन कर्मनामत्वेपि पुनः शब्दशक्त्या दर्शपूर्णमासयोः कालावपि लभ्येते इति शास्त्रेष्वङ्गीकृतत्वात् । अत एव 'वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम्' इत्यत्र तत्प्रख्यन्यायेन कर्मनामत्वं शब्दशक्त्या कालश्च प्रतिपाद्यते इति प्रपञ्चितं स्मृतिकौस्तुभे । एवमिहापि भवितुमर्हति । तस्मात् 'शेषं समावेशने जपेत्' इति वाक्येन सकृदुत्पन्नेन समावेशनसंबन्धिनि काले विनियुक्तस्य कर्मणः (जपस्य वा) पुनः कथं दुर्बलेन सन्निधिना शेषहोमस्याङ्गभावः प्रतिपाद्येत । तस्मात् प्रकरणपाठावष्टंभेन प्रयाजादिवन्नास्याङ्गभावः संभवतीति भिन्नमेवेदं कर्म स्वकीये कालान्तरे भवितुमर्हति । अथापि भवतः श्रद्धामनुरुध्याङ्गभावं प्रतिपद्येमहि एवमपि 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति वाक्येन विहितस्याङ्गस्य बृहस्पतिसवस्येव वसन्ते कालान्तर एवानुष्ठानं समावेशनस्य न्याय्यं मन्यामहे । परमार्थतस्तु बृहस्पतिसवस्येवाङ्गभावं विदधद्वाक्यं नोपलभामह इति न युष्माकमभीष्टस्य स्यात्

(२६. पृष्ठे अन्तिमपङ्क्तौ 'उपस्थापयति' इत्यतः परमिदं द्रष्टव्यम्)

न च बालिकोद्वाहमपेक्ष्यैकत्र मेलनं शयनं वेत्यर्थः, ऋतुमतीविवाहमपेक्ष्य पारिभाषिकोऽर्थः संगच्छतामिति वाच्यम्; विधिवैषम्यप्रसङ्गेन 'द्वयोः प्रणयन्ति' (जै. ३. ७. २३.) न्यायविरोधात्। न चैवमस्माकं 'समावेशने' इति सप्तम्यन्तस्य युगपत्प्रतीयमानमर्थद्वयमङ्गीकुर्वतां विधिवैषम्यः संभवति, प्रतीयमानार्थस्य परित्यागायोगादिति सुधीयो विभावयन्तु॥

मृषैवेति सिद्धम् । न्यायतस्तु ऋतुसमावेशनमेवोपरि वक्ष्य माणमत्रानूदितमिति प्रपञ्चितमधस्तात् । तस्मात् सिद्धम् न चतुर्थदिने समावेशनं विदधात्यापस्तंबो भगवानिति ।

यदुक्तं रागप्राप्तत्वाच्चतुर्थीसमावेशनमनियतम्, ऋतुसमावेशनं पुनर्नियमेन विधीयत इत्यनयोर्भेद एवाङ्गीकर्तव्य इति, अत्रैवं भवान् प्रष्टव्यः । किं पुना ऋतुसमावेशनं रागतः प्राप्नोति आहोस्विन्नेति । यदि न स्याद्रागस्तत्र तर्हि असत्यपि रागे कथं पुनर्व्यवायो अङ्गीक्रियते । व्यवायोपि क्रियते रागोऽपि न भवतीति विप्रतिषिद्धं ह्येतत् । नियमविधिरपि विज्ञानेश्वराचार्यैरुपपादितः रागमवलंब्यैवात्मानं लभते । यथा गार्हस्थ्यधर्माः रागतः प्राप्तं विवाहमवलंब्यैव प्रवर्तन्ते एवं 'ऋतुकालाभिगामी स्यात्' इत्यादिनियमविधिः स्त्रीपुंसो रागमवलंब्यैव प्रवर्तते । अत्राहाक्षेप्ता— कथं पुनर्विवाहो रागप्राप्तः स्यात्; यत्कारणं आश्रमान्तरवत् गार्हस्थ्यमपि नित्यसिद्धमेवेति वैकल्पिकनित्यो विवाहो व्रीहियववत् इति प्रपञ्चितमभियुक्तैर्विमर्शे । नेति ब्रूमः । यदि 'व्रीहियववत्' इत्यत्र व्यवस्थितविकल्पोऽभ्युपगम्येत, तर्हि ब्रह्मचर्यं प्राप्तेन गार्हस्थ्ये नप्रवेष्टव्यम्, गार्हस्थ्याच्च पारिव्राज्यं नाङ्गीकर्तव्यमिति स्यात्; व्यवस्थितत्वात् विकल्पस्य । अथैच्छिकोऽयं विकल्प इति

ब्रूषे तर्हि आगतोऽसि मार्गेण । रागप्राप्तो विवाह इत्युक्ते का पुनस्ते क्षतिः । अत एव 'शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा' (याज्ञ. ३. ५७.) इति पारिव्राज्यप्रकरणे 'रागप्रयुक्तत्वाच्च विवाहस्य' इत्युक्तमाचार्येण विज्ञानेश्वरेण । आस्तां तावदिदं । अनुसरामः प्रकृतम् । तस्मादृतुसमावेशनमपि रागप्राप्तमेवेति कथमस्य चतुर्थीसमावेशनात् भेदमुपपादयसि । ननु नियमानियमाभ्यां भेदं पश्यामः । ऋतुसमावेशनं हि नियम्यते न पुनरन्यत् इति । नेति ब्रूमः । कथं पुनश्चतुर्थीसमावेशनमनियतमेवेत्यवेदीः । रागप्राप्तत्वादिति चेत् तर्हि ऋतुसमावेशनमपि रागप्राप्तमिति तत्राप्यनियमोऽभ्युपगम्यताम् । अथ तत्र विधिरस्ति, नात्रैवं वचनमिति ब्रूषे तर्हि समावेशनमेव चतुर्थदिने नास्तीति कथमत्र नियमानियमयोः अन्यतरः संभवेत । पराक्रान्तं चैतत् प्रथममेव । तस्मादृतुसमावेशनमेवात्रानूद्यते इति न्याय्यं पश्यामः । व्याख्यानमप्यस्मत्पक्षमेवोपोद्बलयति इति प्रपञ्चितं वयोनिर्णये । अथापि भवतः श्रद्धामनुरुध्य चतुर्थीसमावेशनमभ्युपगच्छामः एवमपि न सर्वात्मना दोषाद्विनिर्मोक्षः । रागप्राप्तं चतुर्थीसमावेशनमित्यभ्युपगच्छद्भिः कथं चतुर्थदिनापररात्र एव रागः संभवे-

दिति युक्तं वक्तुम् ; पञ्चम, षष्ठ, सप्तमादिषु यदा कदावापि यदि रागः स्यात् तर्हि तत्रैव विवाहकर्मार्थं भवद्भीष्टं समावेशनाभासं कृत्वा तत्रैव जपो विनियुज्येत । तस्मात् यत्किञ्चित् पदश्रवणमात्रेण यत्किञ्चित् कल्पनमसत्प्रलाप एवेत्युपेक्षणीयम् । यदप्युक्तं 'अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि' इत्यत्रापेः स्वारस्यमनादृतमेव स्यादिति, तत्र मौनमेव सुतरां प्रतिवचनं भवितुमर्हति, तथापि ब्रूमः । 'तिस्रो जपित्वा' इत्यादिना निर्दिष्टे क्रमे यदि अतर्कितोपनतेन दैवेनर्तुगमनमपि कर्तव्यं स्यात् इत्यर्थः । एतदुक्तं भवति । 'प्रजापते तन्वं मे' इत्यन्तं हि चतुर्थदिनापररात्रकर्म । शेषं समावेशने भवति । यदि कदाचित् कुतोपि कारणात् ऋतुगमनपि अप्राप्तं प्राप्नोति तदा पूर्वं 'आरोहोरुमि' त्यादिजपः । ततो 'विष्णुर्योनिम्' इत्याद्यभिमन्त्रणम् इत्येव प्रतिपादयतीति नास्माभिरपेः स्वारस्यमनाद्रियते । अपि च चतुर्थीसमावेशनमपूर्वार्थमङ्गीकृत्य तत्र समावेशनस्य परिभाषया मैथुनार्थं शयनमित्यभ्युपगच्छतां 'दैवादृतुगमनमपि' इत्यादिनाप्राप्ते ऋतुसमावेशने पूर्वं 'आरोहोरुं' इत्यादिविवाहकर्मार्थपत्नीगमनं अनन्तरमृतुगमनमिति एकस्मिन्नेव दिने द्विः पत्नीगमनं प्राप्नोति, तच्चायुक्तं 'सुस्थ इन्दौ सकृत्

पुत्रं' (याज्ञ. १. ८०) इति योगीश्वरेण द्विर्गमनस्य प्रतिषिद्धत्वात् । न च जपमात्रं 'आरोहोरुम्' इत्यादेः भवता अभ्युपगम्यते 'मैथुनार्थं शयनम्' इति वदता । न च 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्रेव इहापि एकमेव पत्नीगमनं कर्मद्वयमनुगृह्णातीति वाच्यम् । तत्र ह्येकस्मिन्नेवाग्निहोत्रकर्मणि दध्नो गुणविधिरभ्युपगम्यते । इह तु चतुर्थीसमावेशनात् भिन्नमेवर्तुसमावेशनमिति कर्मभेदोऽभ्युपगम्यते भवता । तस्मात् कुण्डपायिनामयनाग्निहोत्रन्यायेनैकस्मिन्नहनि द्विः पत्नीगमनं प्राप्नोत्येव । किमतो यद्येवम् । एतदतो भवति दृष्टे संभवत्यदृष्टकल्पनमन्याय्यमेव स्यादिति । अपि च पारिभाषिकमेव समावेशनमिति वदतां 'ऋतुसमावेशने इति ऋतुलिङ्गात्', इति लिङ्गादर्थविवरणं सुदर्शनाचार्यस्य अनर्थकमेव स्यात् । तस्मात् न सर्वात्मना चतुर्थीसमावेशनं सूत्रकारेण विहितमित्यसमञ्जसमेव परेषां प्रत्यवस्थानमिति सिद्धम् ।

स्यादेतत्— आचार्येण हरदत्तेनानाकुलाख्यव्याख्यायां समावेशनन्त्वस्मिन्नेवापररात्रे नियमेन भवति' इति चतुर्थीसमावेशनस्य नियमोऽभिहितः । न च कथमनेनर्तुमतीविवाहः सिद्ध्यतीति वाच्यम् । 'इदमेव समावेशनं मन्त्रवत् नान्यत्' इति वाक्यशेषश्रवणात् । नूनमस्य समये युवतय एव

विवाह्यमाना आसन्निति अनाकुलाख्यागृह्यव्याख्या ज्ञापयति । अन्येनापि आण्डपिल्लयार् नाम्नाचार्येण 'यदि चतुर्थीसमावेशनमृतुसमावेशनं च युगपत्प्राप्नुतः' इति वदता स्पष्टमेवानयोर्भेदोऽभिहितः । मन्त्रोप्यारोहोरुमित्यादिकः अमुमेव पक्षमनुगृह्णाति । तस्माच्छास्त्रीय एवर्तुमतीविवाह इति । एवं प्राप्ते ब्रूमः । नैतदेवमिति । न हि समावेशनपदं भवदभीष्टे व्यवायकर्मणि प्रयुनक्ति आचार्यो हरदत्त इत्यत्र कारणमुपलभामहे । ननु वाक्यशेषमत्र कारणमित्यवोचाम । न । अस्मिन्नेव समावेशने 'आरोहोरुमि'ति मन्त्रजपः नान्यत्र इत्येव तस्यार्थो भवितुमर्हति प्रकृतत्वात् । एतेनान्योप्याचार्यो व्याख्यातो वेदितव्यः । यदुक्तं मन्त्रोप्यनुगृह्णातीति तत् परिहृतं पूर्वमेव 'क्षीरिणाम्' इत्यत्र । अस्माकं पुनः पक्षे तु मन्त्राणां सुतरां प्रयोगसमवेतार्थस्मारकत्वं संभवति । ऋतुसमावेशनस्यैकस्यैव रागतः प्राप्तस्य सूत्रकारेणानूदितत्वात् । तस्मात् चतुर्थीसमावेशनमभ्युपगच्छन्नपि हरदत्ताचार्यः न भवदभीष्टं व्यवायं अङ्गीकरोतीत्यत्र कारणं पश्यामः । अपि च 'शेषं समावेशने जपेत्' इत्यनन्तरं 'यदा मलवद्वासा स्यात्' इति रजस्वलाधर्मानुपादिश्यानन्तरं ऋतुसमावेशनं ब्रवीति । यदि रजस्व-

लैव विवाह्या स्यात् कथं तद्धर्मोपदेशो विवाहानन्तरं स्यात् । तस्मादप्यसङ्गतं परेषां प्रत्यवस्थानम् ।

अथापि स्यात् । कथं रजस्वलाधर्मोपदेशेनर्तुमतीविवाहः प्रतिषिध्येत । आपस्तंबेन भगवतोपदिश्यमानो रजस्वलाधर्मः प्राथमिक एव रजोदर्शने इत्यत्र किं मानम् । प्रत्युत प्रथमर्तौ व्रताभाव एवोपदिश्यते शास्त्रेषु । तथा च निर्णयसिन्धौ स्मृतिचन्द्रिकायाम्—'प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः । अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत्' इत्यादिभिर्व्रताभाव एवोपदिश्यते । उपरिष्टाच्च 'द्वितीयाद्यृतुषु तन्नियममाह मदनपारिजाते दक्षः 'अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम्' इत्यादिनिषेधं पठति । आचारेऽपि प्रथमर्तौ व्रताभावमेवोपलभामहे । सूत्रे पुनरुपदिश्यते व्रतम् । तस्मात् विवाहात् प्राचीनेष्वृतुषु व्रतानुष्ठानं नास्त्येवेति अभ्युपगच्छामः । अपि च 'तिस्रो रात्रीर्व्रतं चरेदञ्जलिनावापिबेदखर्वेणवापात्रेणप्रजायैगौपीथाय' (तै. सं. २. ५. १.) इत्युत्पत्स्यमानप्रजावैगुण्याभावफलकमिदं श्रूयते व्रतम् । तच्च कथं विवाहात् प्राक् प्रजोत्पादनानधिकृताया संभवेत । अथापि भवतः श्रद्धामनुरुद्ध्य अभ्युपगच्छामो व्रतं एवमपि प्राग्विवाहात् मात्रादिभिरु-

पदिश्यतां; ऊर्ध्वं तु विवाहात् पतिना संस्कारार्थं नियमार्थं च पुनरुपदेशो भवतु व्रतस्य । तस्मात् न व्रतोपदेशावष्टंभेनर्तुमतीविवाहप्रतिषेधः सिद्धयति इति । एवं प्राप्ते ब्रूमः— नैतदेवमिति । कस्मात् । प्रमाणाभावात् । तथा हि—भगवान् आपस्तंबः विवाहानन्तरं रजस्वलाधर्मानुपदिश्यानन्तरमृतुसमावेशनं विदधाति । अतः पाठक्रमन्यायेनर्तुमतीविवाहः प्रतिषिध्यत इति गम्यते । न च विवाहात् पूर्वं रजस्वलाधर्माभाव एवेत्यत्र किमपि प्रमाणं पश्यामस्त्वद्वचनादृते । ननु प्रथमतौ व्रतं नास्त्येवेति निर्णयसिन्धौ प्रतिपादितमित्यवोचाम । एतदपि नाभीष्टं पुष्णीयात्; प्रागपि विवाहात् द्वितीयादिष्वृतुषु व्रतस्य अनुष्ठेयत्वात् । अथ प्राग्विवाहात् सर्वेष्वपि ऋतुषु व्रताभावमभ्युपगच्छसि तदपि न सङ्गच्छते प्रमाणाभावात् । प्रथमतौ हि व्रताभावो भवद्रीत्या न पुनरन्येष्वृतुषु । वस्तुतस्तु न भवतामर्थः संभवति निर्णयसिन्धुपरिशीलने प्रेक्षावतां । अतिमन्दं हीदं प्रत्यवस्थानम् । यदुक्तं सत्यपि प्राग्विवाहात् व्रतानुष्ठाने मात्रादिभिरुपदिश्यतामिति तदपि न, प्रमाणाभावात् । नन्वस्त्याचारः । न । विवाहादूर्ध्वं हि मात्रादिभिरुपदिश्यमानं सूत्रविरुद्धमाचारं उपलभामहे । न पुनः प्रागपि वि-

वाहात् उपदिश्यमानम् । तस्मात् स्मृत्याचारविरुद्धमिदं मनोरथमात्रमेव केवलं स्यात् भवताम् । यदप्युक्तं प्रजावैगुण्याभावफलोद्देशेन विधीयमानत्वात् व्रतस्य प्राग्विवाहात् प्रजोत्पादनानधिकृतायाः व्रताभाव एव न्याय्य इति, अत्र ब्रूमः । नात्र फलोद्देशेन व्रतं विधीयते, कामादिशब्दाघटितत्वात् । किंतु औदुम्बराधिकरणन्यायेनार्थवादो भवितुमर्हति । अन्यथा प्रजाकामनारहितया विधवया च व्रतं नानुष्ठेयं स्यात् । तच्च व्यासादिस्मृत्याचारविरुद्धमास्तिकैरनादृयेत । तस्मादर्थवादो भवितुमर्हति । अर्थवादत्वाच्च रजस्वलाभिरनुष्ठेयमेव । अतः प्राग्विवाहादपि रजस्वलया तद्धर्मानुष्ठानं न्याय्यमेव भवितुमर्हति । ननु प्रजोत्पादनानधिकृतया नानुष्ठेयमित्यवोचाम । न । अनधिकृतयापि विवाहानन्तरमुत्पत्स्यमानप्रजावैगुण्याभावफलोद्देशेनानुष्ठानस्य कर्तव्यत्वात् । यथा प्रागपि विवाहात् सत्पतिलाभार्थं अश्वत्थसेचनमीश्वराराधनं च क्रियत इत्याचारः क्वचित् एवमिहापि भवतु । अपि च प्रागपि विवाहात् व्रतानुष्ठानं मास्तु इति प्रत्यवस्थानमेव तावदसङ्गतम् । रजोनिमित्तत्वात् व्रतानुष्ठानस्य । न पुनर्विवाहं निमित्तीकृत्य रजस्वलाधर्माः प्रवर्तन्ते । तस्मादप्यसङ्गतमिदं प्रत्यवस्थानम् । तस्मात् सत्यपि चतुर्थीसमा-

वेशने केषांचिदाचार्याणां मतेन नर्तुमतीविवाहः शास्त्रतः प्राप्नोतीति सिद्धम् । परमार्थतस्तु चतुर्थीसमावेशनमेव नास्तीति प्रपञ्चितमधस्तात् ॥

एवं त्रिरात्रब्रह्मचर्यविधाने न किमपि वक्तव्यमस्ति, पराक्रान्तत्वात् सूरिभिर्वयोनिर्णये । अथापि किञ्चिदुच्यते । आश्वलायनगृह्यव्याख्याने गार्ग्यनारायणः 'वैदेहेषु सद्य एव व्यवायो दृष्टः; गृह्ये तु ब्रह्मचारिणौ त्रिरात्रं इति ब्रह्मचर्यं विहितम्' इत्यब्रवीत् अतोऽवगच्छामः व्याख्यातुः काले सद्यो व्यवाय आसीदिति ऋतुमतीविवाहः शास्त्रीय इति पूर्वपक्षी प्रत्यवतिष्ठते । अत्राभिधीयते; सूत्रविरुद्धमाचारं हि व्याख्याता प्रतिपादयति । सोऽयमाचारः कथं शास्त्रसंमतः स्यात् गृह्यविरोधात् । एवं स्वरसतः प्रतीयमानमर्थं परित्यज्य किमप्यर्थान्तरं कल्पयतां महत् साहसम् । एवमेव हि समावेशनबलादेवर्तुमतीत्वमनुमिमानाः अनाकुलाख्यव्याख्यामाकुलीकुर्वन्ति । तस्मात् सिद्धमृतुमतीविवाहः गृह्येषु नानुज्ञायत इति । एतेन प्रधानमल्लनिबर्हणन्यायेनेतराणि सूत्राणि व्याख्यातानि वेदितव्यानि ॥

इति श्रीवाधूलकुलवंशेन गुरुस्वामिसूनुना नटेशेन विरचितायां
परिणयमीमांसायां श्रुत्यर्थविचारोनाम
प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ॥

श्रौतलिङ्गविचारः ।

अथेदानीं श्रौतलिङ्गस्मार्तश्रुत्योः बलाबलं विचारयामः—स्मृतिषु रजस्वलायाः विवाहः प्रतिषिध्यते, वैवाहिकमन्त्रलिङ्गानि पुनः रजसोऽनन्तरमेव विवाहमपूर्वत्वात् गमयन्ति; तत्र स्मृत्यपेक्षया मन्त्रलिङ्गानि प्रबलानि इति आधुनिकाः प्रतिपादयन्ति इत्येतदेव संशयकारणम् । अतोत्र कः पुनर्न्यायः कश्च न्यायाभास इति विचारयामः; किं तावत् प्राप्तम्? श्रौतलिङ्गस्यैव प्राबल्यमितरेभ्यः इति । कस्मात् । श्रौतत्वात् । श्रुतिर्हि परमं प्रमाणमार्याणां, अपौरुषेयत्वात्; पुरुषप्रणीताश्च पुनः स्मृतयः न निरपेक्षं प्रमाणं भवन्ति; तासां वेदमूलकत्वात् । लिङ्गानि पुनर्वेदेषु उपलभ्यन्ते । अतः तेषां निरपेक्षं प्रामाण्यमभ्युपगन्तव्यम् । ननु 'स्पष्टरवः श्रुतिः' इति न्यायेन श्रुतिलिङ्गाधिकरणोक्तेन स्मार्तश्रुतेरेव प्राबल्यमङ्गीकर्तव्यं; किमिति सा स्मृतिगता इति उपेक्षणीयम् । श्रुतौ वा स्मृतौ वा यत्र अर्थविप्रकर्षः तदेव दुर्बलं इत्येव पन्थाः साधुः । यद्युपक्रम एव शाक्यादिस्मृतिवत्

मन्वादिस्मृतीनामपि प्रामाण्यं प्रतिषिध्यते तत्र सर्वात्मना वैदिकलिङ्गानां प्राबल्यं अभ्युपगच्छामः । आर्या हि वयं वेदाविरुद्धाः स्मृतयः शिष्टपरिगृहीताः प्रमाणमित्येवातिष्ठामहे । अतः किञ्चिदपि वा प्रमाणत्वेनाभ्युपगतानां शिष्टस्मृतीनां श्रुत्यविरोधो अस्ति न वेत्येव परीक्षितव्यम् । अत एव भट्टपादाः—

"नैव तावच्छ्रुतिस्मृत्योः स्वरूपेण विरुद्धता ।
बलाबलपरीक्षा वा प्रमेयद्वारिका हि सा ॥ १ ॥

इत्यादिकमवोचन् शिष्टाकोपाधिकरणे । अतः श्रौतलिङ्गापेक्षया स्मार्तश्रुतेरेव प्राबल्यमभ्युपेतव्यम् इति चेत्– भ्रान्तोऽसि; कथमनादिनिधना दिव्यमयी वेदवाक् प्रामाण्यमूर्धन्या मात्रयापि प्रमाणान्तरेभ्यो दुर्बला भवितुमर्हति । कथं वा स्मृत्यपेक्षया । अहो ! प्रदर्शितं प्रमाणलक्षणविज्ञानं । अपौरुषेयत्वं हि प्रमाणानां प्राबल्ये नियामकम् मन्यन्ते शास्त्रतात्पर्यविदः । तथा हि— समन्वयाधिकरणे (ब्र. १. १. ४) वेदान्तानां कार्यपरत्वं खण्डयन् श्रीमन्तो वाचस्पतिमिश्राः ..... "तेन अपौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः" इत्यवोचन् भामत्याम् । श्रुतप्रकाशिकायामपि "ननु अष्टवर्षं ब्राह्मणं इत्यत्र" इत्या-

दि बहु प्रपञ्चयित्वा "अन्तरङ्गत्वं हि प्रत्यक्षश्रुतिसिद्धम्, क्त्वाश्रुतिस्तु स्मृतिगता" इत्युक्त्वा "क्त्वाश्रुतिः न बलीयसी" इति स्पष्टमेव वैदिकलिङ्गस्य प्राबल्यं प्रतिपादितम् । अतः स्मार्ती श्रुतिः स्वयं जात्या श्रुतिलिङ्गाधिकरणेन प्रबलापि पौरुषेयगतत्वेन दुर्बलैव । प्रबलमेव अपौरुषेयगतं श्रौतलिङ्गम् । अत एव भट्टाचार्याः 'यत्र पुनः श्रुतिरानुमानिकी, लिङ्गं च प्रत्यक्षं, तत्र कथम्; यथा स्मृतिवैदिकलिङ्गविरोधे; तत्र स्मृतेः मूलान्तरमपि संभाव्यते, न तु लिङ्गस्य इति तदेव बलवदित्यनुसर्तव्यम्' इत्यवोचन् । यत्तु 'नैव तावत् श्रुतिस्मृत्योः' इत्यादिभट्टवार्तिकं स्मार्तश्रुतिप्राबल्ये प्रमाणमित्युक्तं तत् पदार्थतत्क्रमबोधकयोः सजातीययोः विजातीययोः प्रमाणयोः प्राबल्यदौर्बल्ये नियामकमिति प्रकृतानुपयुक्तमेव । ननु यद्येवं कथं तर्हि आचारकाण्डे सायंसन्ध्याप्रकरणे 'वारुणीभिस्तथादित्यम्' इत्यत्र स्मार्तश्रुतेः प्राबल्यं प्रत्यपादयन् । अत्र ब्रूमः— उपेक्षणीयमेवात्र माधवाचार्याणां मतम् न्यायविरोधात् । अथवा तत्र श्रौतलिङ्गस्य अन्यत्र चारितार्थ्यं बीजं इति कृत्वा इति परिहारः कर्तव्यः । तर्हि आपस्तंबगृह्यव्याख्यानावसरे 'अन्यो वैनामभिमन्त्रयते' इत्यत्रापि स्मार्तश्रुतेरेव प्राबल्यं सुदर्शना-

चार्याः अभ्युपगच्छन्तीति चेत्, ब्रूमः । भ्रान्त एवात्र सुदर्शनाचार्यः न्यायविरुद्धं ब्रवीतीति । तस्मात् सर्वात्मना अपौरुषेयस्य श्रौतलिङ्गस्यैव प्राबल्यमङ्गीकर्तव्यम् । इति प्रकृतेपि विवाहविषये श्रौतलिङ्गस्वारस्यात् रजस्वलाविवाहस्यैव प्राथमकल्पिकत्वम् । इत्येवं प्राप्ते,

ब्रूमः—स्मार्तश्रुतेरेव प्राबल्यमङ्गीकर्तव्यमिति । कस्मात् । न्यायमूलकत्वात् । तथा हि— श्रुतिर्हि नः सर्वेषां परमं प्रमाणमित्यत्र न कोऽपि विसंवदते । तदविरुद्धाः स्मृतयः तन्मूलकत्वात् प्रमाणमेव इति विरोधाधिकरणे प्रपञ्चितम् । अनन्तरं विरोधः पुनः श्रुतिस्मृत्योः कास्ति नास्तीति प्रतिपादयितुं तृतीयं शिष्टाकोपाधिकरणमारचयति भगवान् सूत्रकारः । तत्रायमभिप्रायः शास्त्रदीपिकाकाराणाम् । शिष्टपरिगृहीतानां मन्वादिस्मृतीनां सांख्ययोगपाञ्चरात्रपाशुपतशाक्यादिस्मृतीनामिव न वेदेनसहजन्मना वैरमस्ति, येन तासामपि शाक्यादीनामिव स्वरूपतो विरोधः अभ्युपगम्यते । किन्तु यावता वेदं न विरुन्धन्ति तावतैव तासां प्रामाण्यम् । अतः विरोधः पुनरनयोरस्ति न वेत्येव परीक्षितव्यम् । स च प्रमेयनिबन्धनः । अतः प्रमाणविरोधापेक्षया प्रमेयविरोधस्यैव प्राबल्यं सिद्ध्यति । यदि मन्वादिस्मृतिषु आजान-

सिद्धः प्रद्वेषः, तर्हि प्रथममेव शाक्यादिस्मृतीरिव ता अपि परित्यज्यन्ताम् । अतः न सर्वप्रकारेण प्रमाणबलमेकमेवाङ्गीकृत्य प्रत्यवस्थातव्यम् । तस्मात् यदि प्रमेये स्मृतिः शीघ्रमेव बोधमुत्पादयति, तर्हि सैव बलीयसी इति अङ्गीकर्तव्यम् । इति । अत एव भट्टपादाः "नैव तावत् श्रुतिस्मृत्योः स्वरूपेण विरुद्धता । बलाबलपरीक्षा वा प्रमेयद्वारिका हि सा ।' इत्यादिकमवोचन् । न हि सर्वो बलवानिति दुर्बलं हिंस्यादेव । कदाचित् दुर्बलमपि अनुसरेत् । अत एवान्यत्र 'विधिस्तदैव बाधकं यद्यबाधेन नोपपद्येत' इत्यब्रवीत् पार्थसारथिमिश्रः । विरोधस्य किं लक्षणं इत्याकाङ्क्षायाम्— 'युगपत्प्राप्तिहेतुश्च विरोधस्तुल्यकार्ययोः' इति भट्टपादाः प्रत्यपादयन् । तदेवं यदि प्रमेये पुनः श्रुतिस्मृत्योर्युगपत्प्राप्तिः तर्हि प्रमाणबलमास्थाय श्रुतिरेव गरीयसीति अनाकुलः पन्थाः । यदि तु प्रमेये स्मृतिः शीघ्रमेव बोधमुत्पादयति तर्हि स्मृतिरेव गरीयसी; प्रमाणबलापेक्षया प्रमेयबलस्यैव प्राबल्यात् । अत्रेदं बीजम् । यावता श्रौतं लिङ्गमुपलभ्य कमप्यर्थविशेषं कल्पयामः, तावतैव प्राञ्चैः परमर्षिभिः अस्माद्वान्यस्माद्वा वेदवाक्यात् निर्धारितोर्थः स्मृतिषूपलभ्यमानः बुद्धिमारोहति । अर्थात्, वेदा-

नाम् अपौरुषेयत्वेन प्राबल्येपि कल्प्यत्वेन दौर्बल्यम् ; स्मृतिवचनानां पौरुषेयत्वेन दौर्बल्येपि कल्पत्वेन प्राबल्यमिति फलति । न च स्मृत्यादीनां भ्रान्त्यादिमूलकत्वस्यापि संभवात् वेदस्य तादृशसंभावनाया एव असत्वात् श्रुत्यनुमानमात्रमावश्यकमिति श्रौतलिङ्गस्यैव प्राबल्यं किं न स्यादिति वाच्यम् । यतः 'तीर्थस्थाणु' इत्यापस्तंबगृह्यव्याख्याने 'नन्वाचाराच्छ्रुतिरनुमेयेति न तयालिङ्गबाधो युक्तः' इति स्थिते पूर्वपक्षे, 'मैवं लिङ्गस्यात्र श्रुतिविहितशेषिविषयसापेक्षत्वात् ; तत्र ह्यनुमेयश्रुतेर्दौर्बल्यं यत्रास्याः प्रत्यक्षश्रुत्यैव विरोधः । अतोऽनुमेयाऽपि श्रुतिः सापेक्षलिङ्गबाधिकैव' इति सुदर्शनाचार्येण व्यवस्थापितत्वात् ।

अत एव आर्यम्लेच्छाधिकरणे म्लेच्छप्रसिद्धेः प्राबल्यमित्थं समर्थितम् शास्त्रकारैः । क्वचिदाचारापेक्षयापि श्रौतलिङ्गस्य दौर्बल्यमङ्गीकृतम् । अत एव हि 'उपरि हि देवेभ्यो धारयति' इत्यत्र आचारप्राप्तमेवानुवदतीदं वचनमिति पूर्वपक्षः कृतः । नचायं पूर्वपक्ष इति उपेक्षामर्हति । सिद्धान्ते पुनरस्य उपमर्दाभावात् । तस्मात् सिद्धं शास्त्रतः स्मार्तश्रुतेः प्राबल्यम् ॥

यत्तूक्तं समन्वयाधिकरणे अपौरुषेयत्वमेव हि प्रमाणानां

प्राबल्ये नियामकं मन्यन्ते वाचस्पतिमिश्राः इति, तत् तथा नेति कोऽब्रवीत् । वयमप्येवमेव ब्रूमः । अभ्युपगते च स्मृतीनामपि शिष्टपरिगृहीतानां प्रामाण्ये प्रमेयबलाबलमनुसृत्यैव निर्णयः कर्तव्यः इत्येवातिष्ठामहे । तच्च सर्वतन्त्रस्वतन्त्राः श्रीमन्तो वाचस्पतिमिश्रा अपि अभ्युपगच्छन्ति । अत एव 'लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि' (ब्र. ३. ३. ४४.) इत्यधिकरणे आर्यम्लेच्छाधिकरणन्यायेन आन्ध्रप्रसिद्धेरेव प्राबल्यमङ्गीकर्तव्यमिति राजशब्दः क्षत्रियजातौ रूढः इति अवेष्ट्यधिकरणं न्यरूपयन् भामत्याम् । अपि च न समन्वयाधिकरणे वेदस्यापौरुषेयत्वं स्थापयितुं प्रवृत्ताः श्रीमन्तो वाचस्पतिमिश्राः । किन्तु भूतं वस्तु प्रतिपादयतां वेदान्तानां अपौरुषेयत्वं न सिद्धयेत्, भूतार्थत्वात्; अतः कार्यपरत्वं तेषामपि अङ्गीकर्तव्यमिति विवदमानं पूर्वपक्षिणं प्रति 'यदि भूतार्थत्वेनापौरुषेयत्वं वेदान्तानां न सिद्ध्यते, तर्हि कार्यार्थत्वेनापि तन्न सिद्धयेत्' इति वेदस्य पौरुषेयत्वप्रसङ्गः; अतः अन्यथा यतितव्यमपौरुषेयत्वं व्यवस्थापयितुम्; तच्च प्रदर्शितं न्यायकणिकायां मण्डनाचार्याणां 'विधिविवेक' व्याख्यानावसरे इति भूतार्थत्वेन नापौरुषेयत्वमपैतीत्येव प्रतिपादयितुं

प्रवृत्ताः इति स्पष्टमेव नानुकूलं प्रकृतस्य । यदप्युक्तं श्रुतप्रकाशिकायां वैदिकलिङ्गस्य प्राबल्यं प्रतिपादितमिति, तत्र न स्मार्तश्रुतेः दौर्बल्यमिति कृत्वा ; किन्तु अर्थापत्त्या अन्यथानुपपत्तिलक्षणया श्रौतलिङ्गस्य प्राबल्यम् 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति सिद्धयतीति कृत्वा । यच्चोक्तम् 'यत्र पुनः श्रुतिरानुमानिकी, लिङ्गं च प्रत्यक्षम्' इत्यादिकमवोचन् भट्टाचार्याः इति तत्रापि आनर्थक्यप्रतिहतत्वमेव कारणम् ; ननु अर्थविप्रकर्षात् पारदौर्बल्यं प्रतिपादयितुं प्रवृत्ते ह्यधिकरणे कथमानर्थक्यप्रतिहतत्वप्रदर्शनस्यावकाशः ? । प्रसङ्गादिति ब्रूमः ।। ननु कस्मात् 'प्रमाणप्राबल्यमङ्गीकृत्य' इति नाभ्युपगम्यते इति चेत् ब्रूमः । यद्यर्थविप्रकर्षनिबन्धनमेव दौर्बल्यमङ्गापि अभ्युपगच्छेत् तर्हि वाक्यशेषेऽपि तदेव कारणमुपनिबध्नीयात् । नैवमुपन्यबध्नात् । किं तु 'तत्र स्मृतेः मूलान्तरमपि संभाव्यते । न तु लिङ्गस्य' इत्येव अब्रवीत् । तस्मादानर्थक्यप्रतिहतत्वमालोच्यैव प्रमाणबलमाश्रितमाचार्यैरित्येव अभ्युपगन्तव्यम् । अत एवाग्रेऽपि 'न प्रमाणविरोधेन निर्णयः कर्तव्यः, किं तु प्रमेयविरोधेनैव इति शिष्टाकोपे अवोचाम इति स्मारयति——

'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥' इति

अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः ।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥'

इति च ब्रुवन् । तस्मात्कारणादवगच्छामः आनर्थक्यप्रतिहतत्वमेवात्र मूलमिति । अत एव अस्यैव वार्तिकस्य व्याख्यानावसरे 'अनन्यगतित्वात् स्मृतिं बाधते' इति भट्टसोमेश्वरोऽपि न्यायसुधायामब्रवीत् । तस्मादप्यसङ्गतमेवेदं वार्तिकमवलम्ब्य प्रत्यवस्थानम् ॥

यदप्युक्तं 'नैव तावत् श्रुतिस्मृत्योः' इत्यादिवार्तिकं पदार्थतत्क्रमबोधकयोः सजातीययोः विजातीययोश्च प्रमाणयोः प्राबल्यदौर्बल्ये नियामकमिति; तत् तथैव वयमप्यभ्युपगच्छामः । अत एव च स्मार्तश्रुतेः प्राबल्यमातिष्ठामहे पदार्थतत्क्रमबोधकयोः श्रुतिलिङ्गयोः सजातीयविजातीयप्रमाणयोः प्राबल्यदौर्बल्ये नियामकमिति । अपि चात्र भवान् पृष्टो व्याचष्टाम्; किं पदार्थः श्रुत्या बोध्यते, अहोस्वित् लिङ्गेनेति । श्रुतिर्वा लिङ्गं वा अन्यद्वा यत् किंचित् पदार्थं बोधयत् प्रबलमेवेति अभ्युपगच्छता भवता प्रमेयगतबोध एवात्र कारणमङ्गीकर्तव्यम्; अन्यथानुपपद्यमानत्वात् । तच्च कथं भव

त्पक्षे सङ्गच्छते; तथाहि— न हि वेदबोधितः पदार्थक्रमः स्मृत्या बोध्यमानं पदार्थमप्यपेक्षते । स्मार्तपदार्थस्य जात्या प्राबल्येऽपि पौरुषेयस्मृतिगतत्वेन दौर्बल्यमेवेति भवता अभ्युपगम्यमानत्वात् । 'वेदं कृत्वा' इति 'क्त्वा' श्रुतेः अपौरुषेयगतत्वेन क्रमस्यैव जात्या दौर्बल्येपि प्राबल्यमङ्गीकर्तव्यम् आयुष्मता । अथ 'प्रमेयविरोधनिबन्धनः निर्णयः' इति स्मार्तमपि पदार्थमालोच्यैव वैदिकी 'क्त्वा' श्रुतिः प्रवर्तते इति अभ्युपगच्छसि, आगतोसि मार्गेण । अत एव श्रीमान् पार्थसारथिमिश्रोपि एवमेवाब्रवीत् शास्त्रदीपिकायामिति परित्यज्याभिमानम् स्मार्तश्रुतेः प्राबल्यमङ्गीकर्तव्यम् भवता । सर्वथापि तु निरर्थकमिदं प्रत्यवस्थानम् । यदपि माधवसुदर्शनाचार्यप्रभृतयो भ्रान्ता एवेति तदसत्प्रलाप एवेत्युपेक्षणीयम् । तस्मादानर्थक्यप्रतिहतत्वमन्तरेण सर्वत्रापि स्मार्तश्रुतेः प्राबल्यमङ्गीकर्तव्यमिति सिद्धम् । ऋतुमतीविवाहमुपोद्बलयच्छ्रौतं लिङ्गं तु नास्त्येवेति प्रपञ्चितमतीतेऽध्याये । इह तु तदस्तीति कृत्वा प्रवर्तिता चिन्ता— अत्रेदमपि न प्रस्मर्तव्यम्; सामान्यसंबन्धबोधकप्रमाणमन्तरेण लिङ्गादीनां किञ्चिदर्थावबोधकत्वं नास्त्येवेति । श्रुत्यादिषट्प्रमाणानामन्यतमं सामान्यसंबन्धं बोधयेत् । इह

तु अनारभ्याधीताः खिलाः किल लिङ्गत्वेनाभ्युपगम्यन्ते भवता। न चैकाग्निकाण्डसमाख्ययासामान्यसंबन्धबोधो भवत्विति वाच्यम् । नेयं समाख्या अव्यभिचरितेन विवाहमेव बोधयेत्, इतरेषामपि स्मार्तकर्मणामत्र बोधसंभवात्। तस्मादत्यन्तदुर्बलमेतच्छ्रौतलिङ्गमस्तीति प्रत्यवस्थानम् इति सिद्धम् ॥

इति श्रीवाधूलकुलवंशेन गुरुस्वामिसूनुना नटेशेन विरचितायां
परिणयमीमांसायां बलाबलविचारोनाम
द्वितीयोध्यायः ॥



तृतीयोऽध्यायः ॥

अवसितः श्रुत्यर्थविचारः । इदानीं स्मृतीर्विचारयामः । तत्र गर्भाष्टमं वयो हि स्त्रीणां विवाहकाल इति प्रथममेव प्रपञ्चितमस्माभिर्भूमिमाराचितवद्भिः । गौणोपि कालः प्राक्-रजोदर्शनात् इति स्मृतिभ्योऽवगच्छामः । कथं । प्रायश्चित्त-स्मरणात्, निन्दाश्रवणात्, निषेधदर्शनाच्च । प्रायश्चित्तं हि स्मर्यते विवाहात् पूर्वं रजः पश्यन्त्याः कन्यायाः, तत्पितुः, तद्बोद्धुश्च स्मृतिषु । तथा हि—— निर्णयसिन्धावाश्वलायनः——

'कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः ।
शुद्धिं च कारयित्वा तामुद्वहेदनृशंसधीः ॥ १ ॥

पिता ऋतून्स्वपुत्र्यास्तु गणयेदादितः सुधीः ।
दानावधि गृहे यत्नात् पालयेच्च रजोवतीम् ॥ २ ॥

दद्यात् तदृतुसंख्या गाः शक्तः कन्यापिता यदि ।
दातव्यैकापि निःस्वेन दाने तस्याः यथाविधि ॥ ३ ॥

दद्याद्वा ब्राह्मणेष्वन्नमतिनि:स्व: सदक्षिणम् ।
तस्यातीतर्तुसंख्येषु वराय प्रतिपादयेत् ॥ ४ ॥

उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पय: ।
अदृष्टरजसे दद्यात् कन्यायै रत्नभूषणम् ॥ ५ ॥

तामुद्वहन् वरश्चापि कूश्माण्डैर्जुहुयात् द्विज: ॥' इति ।

एवं विवाहात् प्राग्रजोवत्या: प्रायश्चित्तस्मरणात् निषेध एव रजसोनन्तरं स्त्रीणां विवाहस्य । ननु प्रायश्चित्तानन्तरमपि विवाहोऽभ्यनुज्ञायते । सत्यं; आपत्कल्पतयाऽभ्यनुज्ञायते । न पुनर्गौणतया । कथं । न क्वापि गौणकालेऽनुष्ठीयमानस्य प्रायश्चित्तं विहितं पश्याम: । प्रायश्चित्तं हि कालातिक्रमेण संभूतस्य दुरितस्य निवारणाय विधीयते ह्यधिकारसिध्यै । तद्धि कथं गौणत्वाभ्युपगमे सङ्गच्छेत । मुख्यकालकृतं पुण्यं हि केवलं न संभवति गौणकाले । न चैतावता दोषोपि संभवतीति ब्रह्मणापि सुवचम् । अत एव 'आषोडशात् ब्राह्मणस्य सावित्री नातिवर्तते' (मनु. २. ३८.) इति गौणकालस्य दोषं नास्मरत् भगवान् मनु: । उत्तरत्रापि स एव 'अत ऊर्ध्वं त्रयोप्येते यथा कालमसंस्कृता: । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिता:' (मनु २ ३९.) इति

दोषं संकीर्तयति, विदधातिच प्रायश्चित्तं 'येषां द्विजानां सावित्री नानूच्येत यथाविधि । तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्' (मनु. ११. १९१.) इति । अत्र 'येषां ब्राह्मणक्षत्रियविशां आनुकल्पिककाल उपनयनं न कृतवान्' इति वदन् गौणस्यापि कालस्यातिक्रम एव प्रायश्चित्तं न्याय्यं मन्यते । एवं योगीश्वरेणापि भगवता 'अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः । सावित्री पतिता व्रात्याः व्रात्यस्तोमादृते क्रतोः' (याज्ञ. १. ३८.) इति उपनयनस्य परमावधिकालानन्तरमेव प्रायश्चित्तं विधीयते । एवमापस्तम्बेनापि भगवता गौणकालविधानानन्तरमेव 'अतिक्रान्ते सावित्र्याः काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्' इत्यधिकारसिद्ध्यै प्रायश्चित्तं संकीर्त्य, 'अथोपनयनम्' 'ततः संवत्सरमुदकोपस्पर्शनम्' इत्यध्ययनयोग्यतासिध्यर्थं श्रावयित्वा 'अथाध्याप्यः' इत्यध्यापनं विधीयते इति नैतत् तिरोहितमस्माकम् । नैवं गौणकाले मुख्यकालातिक्रान्तिप्रायश्चित्तमस्मार्षीत् । अत एव 'सावित्री नातिवर्तते' इत्यब्रुवन् मन्वादयो महर्षयः । एवमिहापि प्रागुद्वाहात् रजः पश्यन्त्याः प्रायश्चित्तं स्मर्यत इति रजस्वलायाः विवाहाभ्यनुज्ञानं आपत्कल्प एव भवितुमर्हति न पुनः गौणोऽयं कल्पः ।

ननु कालातिक्रमे सति कथमभ्यनुज्ञा सङ्गच्छेत । न कापि अतिक्रान्तकाले पुनर्विधानं सङ्गच्छते इति चेत्, न । उपनयनस्थानापन्नस्य संस्कारस्यावश्यमनुष्ठेयत्वात् प्रायश्चित्तानन्तरं अभ्यनुज्ञा सङ्गच्छत एव । श्रूयत एव च पुनर्विधानमुपनयनादिषु, 'तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्' (मनु. ११. १९१.) इत्यादिदर्शनात् । ननु प्रायश्चित्तस्मरणं नापत्कल्पत्वे कारणं भवितुमर्हति प्रमाणाभावात् । नेति ब्रूमः । गौणतयापि वाभ्युपगते काले प्रायश्चित्तस्मरणस्यान्याय्यत्वात्, आपदि विहितस्य ब्राह्मणादिषु क्षत्रियादिधर्मस्य अनापदि प्रायश्चित्तस्मरणाच्च । अत एव कुल्लूकभट्टः 'आनुकल्पिककाल उपनयनं यथाशास्त्रं न कृतवान्' इत्याह । तस्मात् प्रायश्चित्तस्मरणं अतिक्रान्त एव काले भवितुमर्हतीति तदनन्तरं विधानमापत्कल्पमेवोपस्थापयेत् । स्यादेतत् । प्रायश्चित्तस्मरणमेवापत्कल्पत्वे कारणं भवितुमर्हतीति नायमेकान्तः । अन्तरेणापि प्रायश्चित्तमापत्कल्पस्य स्मृतिषूपलभ्यमानत्वात् । अत एव 'अर्वाक् सपिण्डीकरणं यस्य संवत्सरात् भवेत् । तस्याप्यन्नं सोदकुम्भं दद्यात् संवत्सरं द्विजे' (याज्ञ. १. २५५.) इत्यत्र 'यदपि वचनं षोडशश्राद्धानि कृत्वैव सपिण्डीकरणं संवत्सरात् प्रागपि

कर्तव्यं' इति सोऽयमापत्कल्पः इत्यब्रवीत् आचार्यो विज्ञानेश्वरः । किमतो यद्येवम् । एतदतो भवति ; यथान्तरेणापि प्रायश्चित्तमापत्कल्पः श्रूयते एवं सत्यपि प्रायश्चित्ते गौणोपि कल्पः श्रूयताम्, तत्र किं तव च्छिन्नम् । अत एव गौणकाले क्रियमाणस्यापि प्रायश्चित्तं विहितं दृश्यते दक्षिणायनमरण रात्रिमरण अर्घ्यप्रदानादिषु । अत्र ब्रूमः । अपूर्वमिदमायुष्मतः पाण्डित्यं प्रदर्शितम् । न हि दक्षिणायनरात्र्यादयः मरणे गौणकालतया विधीयन्ते अशक्यविधानात् । किं तु 'यस्याहिताग्नेरग्निर्गृहान् दहति अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, इति क्षामवतीष्टिविधानमिव दक्षिणायनमरणादिषु प्रायश्चित्तं विधीयते । कथमत्र गौणत्वं आपत्कल्पत्वं वा स्यात् ईश्वरतन्त्रत्वात् मरणादेः । पुरुषतन्त्रत्वाच्च विवाहादीनां तत्र प्रायश्चित्तमापत्कल्पत्वमेवावगमयेत्। अर्घ्यदानमपि न भवतामनुकूलं प्रायश्चित्तार्घ्यस्यातिक्रान्तकालिकत्वात् । यदपि सपिण्डीकरणमुदाहृतम्, अत्र ब्रूमः । न वयं प्रायश्चित्तस्मरणमेव आपत्कल्पत्वे कारणमब्रूम येन भवतामभीष्टः सिध्यति । किं तु प्रायश्चित्तमापत्कल्पमेवोपस्थापयेत् इत्येवावोचाम । तस्मादन्तरेणापिप्रायश्चित्तं तत्र तत्र वचनादापत्कल्पत्वं श्रूयमाणं नास्मत्पक्षं प्रतिकूलयति ।

तस्मात् प्रायश्चित्तस्मरणात् रजसोनन्तरं स्त्रीणां विवाहः न्यायतः प्रतिषिध्यत इति ॥

अथापि स्यात् । प्राग्विवाहात् रजः पश्यन्त्याः प्रायश्चित्तं कैश्चिदेवाश्वलायनादिभिः स्मर्यते, न पुनः सर्वैरपि मनुबोधायनादिभिः । अतः यत्र स्मर्यते प्रायश्चित्तं तत्तेषामेव शाखिनां न पुनरितरेषाम्, यथा शिरोव्रतमाथर्वणिकानामेव नियम्यते तद्वत् । नेति ब्रूमः । आश्वलायनोक्तप्रायश्चित्तस्य अन्यत्रोपसंहर्तव्यत्वात् । प्रसिद्धं चेदं 'सर्वाभेदादन्यत्रेमे' (ब्र. ३. ३. १०.) 'आनन्दादयः प्रधानस्य' (ब्र. ३. ३. ११.) इत्यादिषु । एवमिहापि मानवीयादिषु स्मृतिषु गम्यते निन्दा असंस्कृतायाः रजस्वलायाः कन्यायाः । अथापि सर्वत्र तादृशकन्यायाः प्रदानं विधीयते तत्र केचित् प्रायश्चित्तानन्तरं प्रदानं स्मरन्ति । केचित् प्रदानमात्रम् । सर्वत्राविशेषेण निन्दायाः गम्यमानत्वात् क्वचिच्छ्रूयमाणं प्रायश्चित्तमन्यत्रापि प्रदानप्रत्यभिज्ञानादुपसंहर्तव्यमेव अघशोधनार्थम् । अत एव 'शिरःकपालीध्वजवान् भिक्षाशी कर्मवेदयन् । ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्' (याज्ञ. ३. २४३.) इत्यत्राश्रूयमाणानामपि सवनेषूदकस्पर्शनसन्ध्यावन्दनाघमर्षणा-

दीनां अन्यत्र प्राप्तानामत्रापि उपसंहारः अभ्युपगन्तव्यः इति निर्णीतमाचार्येण विज्ञानेश्वरेण न पुनर्योगीश्वरेणानुक्तमिति परित्यक्तम् । अत एव च भगवता योगीश्वरेण न केवलं 'शिरःकपाली' (याज्ञ. ३. २४३.) 'सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम्' (याज्ञ. ३. २५३.) इत्यादिभिः शुद्धिमाप्नोति, किन्तु पवित्राणां मन्त्राणां जपसमुच्चयेनेति कृत्वैव 'शुक्रियारण्यकजपो गायत्र्याश्च विशेषतः । सर्वपापहरा ह्येते रुद्रैकादशिनी तथा' (याज्ञ. ३. ३०७.) इति पवित्राणां मन्त्राणां जपमस्मार्षीत् । शिरोव्रतं त्वाथर्वणिकानामेव । अन्येषां तत्स्थाने व्रातान्तरस्योपदेशेनोपसंहारे प्रयोजनाभावात् । इह तु अघशोधनात्मकस्य प्रयोजनस्य सत्वादविरोधादपेक्षितत्वाच्चाघशोधनस्य 'आनन्दादयः प्रधानस्य' (ब्र. ३. ३. ११.) इत्यधिकरणन्यायेन मानवीयादिष्वपि स्मृतिषूपसंहारः कर्तव्यः प्रायश्चित्तस्य । तस्मात् सिद्धं प्रायश्चित्तस्मरणमापत्कल्पमेवोपस्थापयति न पुनर्गौणाख्यं कल्पमिति प्रतिषेध एव शिष्यते रजस्वलाविवाहस्य स्मृतिभिरिति ।

अपि च नैवात्र विवदितव्यं कथमयं विवाहः प्रतिषिध्यत इति ; यत्कारणं निन्दापि श्रूयते स्मृतिष्वेतादृशविवाहस्य । तथा चाह भगवान् पराशरः—

'अष्टवर्षा भवेत् गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत् कन्या अत ऊर्ध्वं रजस्वला ॥ १ ॥

प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिबन्ति पितरः स्वयम् ॥

माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ २ ॥

यस्तां समुद्वहेत् कन्यां ब्राह्मणोऽज्ञानमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ॥ इति ॥

यदि गौणतयापि रजसोनन्तरं विवाहोऽभ्यनुज्ञायेत कथमत्र श्रूयमाणा निन्दोपपद्येत । न च गौणकाले क्वापि निन्दा श्रूयत इत्यवोचाम । तस्मात् रजस्वलाविवाहः प्रतिषिध्यत एव । ननु पराशरो हि भगवान् सप्तमाध्याये हि शुद्धिप्रकरणे रजस्वलोद्वाहनिन्दां स्मरति; तत् कथमृतुमतीविवाहं प्रतिषेद्धुमर्हति अविवक्षितत्वात् इति चेन्न; 'तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि' इत्यत्रेवासंबद्धमध्ये पठितमिति प्रकरणोत्कर्षस्य कर्तव्यत्वात् । ननु निन्दावचनैः कथं प्रतिषेधः सिध्यति । अपूर्वत्वात् विधिं कल्पयामः इति चेन्न । शुद्धिप्रकरणं ह्यारभ्य हीयं निन्दा पठ्यते न पुनरना-

रभ्याधीयते येनापूर्वत्वात् विधिरभ्युपगम्येत । अत एव 'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः' (छा. १. १. ३) इत्यत्रानारभ्याधीतत्वात् विधिरभ्युपगम्यते 'स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्' (ब्र. ३. ४. २१) इत्यधिकरणे । अनारभ्याधीतत्वमस्य निर्धारितं तन्निर्धारणाधिकरणे । इह त्वारभ्याधीतत्वात् न विधिरभ्युपगन्तुं शक्यत इति 'नहिनिन्दान्यायेन' मुख्यकालप्रशंसामेव निन्दावचनानि गमयेयुः इति । अत्र ब्रूमः । सत्यमारभ्याधीयत एव । तावता विधिर्नाभ्युपगन्तव्य इति कथमवेदीः । अपूर्वत्वं हि विधिकल्पने कारणं भवितुमर्हति न पुनरारभ्याधीतत्वमनारभ्याधीतत्वं वा । अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४. ४. २२.) 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' (बृ.४.४.२२) इत्यादिष्वारभ्याधीतेष्वपि विधिरभ्युपगन्तव्योऽपूर्वत्वात् संयोगस्य इति प्रपञ्चितम् 'सर्वापेक्षाधिकरणे' (ब्र.३.४.२६)। यच्च स्तुतिमात्राधिकरणं प्रपञ्चितं तत्रापि अपूर्वत्वमेव कारणं प्रदर्शितं विधिकल्पने सूत्रकृता न पुनरन्यत् । एवमिहापि आरभ्याधीतेष्वपि निन्दावचनेषु अपूर्वत्वादर्थसंयोगस्य प्रतिषेधविधिरेवाभ्युपगन्तव्यः । यदुक्तं नहिनिन्दान्यायेन सङ्ग-

च्छत इति तन्न । प्रमाणान्तरविरोधे सति नहिनिन्दान्याय: सङ्गच्छते इति प्रपञ्चितं मीमांसकै: । इह त्वसति बाधके प्रतीयमानार्थे तात्पर्यमनङ्गीकुर्वतां देवताधिकरणन्यायमवजानतां महत् पाण्डित्यम् । तस्मात् निन्दावचनेभ्य: प्रतिषेधविधिरेवाङ्गीकर्तव्य इत्युत्पश्याम: । स्यादेतत् । पराशरो हि भगवान् न रजस्वलोद्वाहं प्रतिषेधति, अपि तु 'प्राप्ते तु द्वादशे वर्षे' इत्यादिवचनै: द्वादश वर्षदेशीयामप्रयच्छत: दोषं सङ्कीर्तयति । न । 'अत ऊर्ध्वं रजस्वला' इत्युक्त्वाऽनन्तरमेव 'प्राप्ते तु' इति वाक्यस्य पठितत्वात् । ननु 'अत ऊर्ध्वं रजस्वला' इति वाक्येनैकादशे वयसि रजस्वलावदशुद्धिमाप्नोति कन्या, द्वादशे वयस्यप्रदानं पितृणां नरकहेतु:, 'माता चैव पिता चैव' इति वचनेन साक्षादेव रजोदर्शनं मात्रादीनां नरकहेतुरिति वाक्यार्थ: कथं न स्यात् । न स्यात् प्रातर्दनाधिकरणन्यायविरोधात् । तत्र हि 'त्रिविधमुपासनं प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनञ्चेति । न चैतदेकस्मिन् वाक्येऽभ्युपगन्तुं युक्तम् । उपक्रमोपसंहाराभ्यां वाक्यैकत्वमवगम्यते' इति निपुणतरमुपपादितं श्रीमद्भि: भगवत्पूज्यपादै: 'जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह

तद्योगात्' (ब्र. १. १. २१.) इत्यत्र । एवमिहापि त्रिविधमपूर्वं दोषकीर्तनं विवक्षितं स्यात् । भिद्येत हि तदा वाक्यम् । तस्मादन्याय्यमेवेदमर्थकल्पनम् । ननु 'अत ऊर्ध्वं रजस्वला' इति 'दृष्ट्वा कन्यां रजस्वलां' इति स्पष्टरजोदर्शनकीर्तनात् न्याय्यमेवास्मदीयमर्थकल्पनमिति । नैवं स्यात् । 'रजस्वला' इति परिभाषितत्वात् स्पष्टदर्शनस्यावैयर्थ्यापत्तेः । ननु नाद्यापि परिभाषेति सिद्धम् । नैष दोषः । आनन्दमयाधिकरणन्यायेन प्रायपाठप्रवाहे पठितस्य रजस्वलाशब्दस्य परिभाषात्वस्याभ्युपगन्तव्यत्वात् । तस्मादणुमात्रमपि रजस्वलोद्वाहं विस्मरणेनापि स्वप्नेपि वा नाभ्यनुजानाति भगवान् पराशर इति सिद्धम् । तत्प्रकोपो यथा न स्यात् तथा यतितव्यम् विशेषेणास्माभिः कलिजैः । तस्मात् प्रतिषेधबलात् अन्यत्र श्रूयमाणाभ्यनुज्ञा ह्यापद्येवेति अकामे नाप्यङ्गीकर्तव्यम् । गौणत्वाभ्युपगमे निन्दा नोपपद्येत । तस्मात् सिद्धमृतुमतीविवाहः स्मृतिषु प्रतिषिध्यत इति ॥

अथापि स्यात्— निन्दा पुनर्नोपपद्येतेति नायं दोषः । सर्वेषां निन्दावचनानामर्थवादत्वेनार्थवादानां स्वार्थे प्रामाण्याभावेन नहिनिन्दन्यायेनेतरस्य मुख्यकालस्य प्रशंसायै स्यादित्यवोचाम । भवदेतदेवं यदि निन्दैव केवलं श्रूयेत ;

अपि त्विह निषेधोऽपि श्रूयते 'नोपरुन्ध्यात् रजस्वलाम्' इति, 'प्रयच्छेन्नाग्निकां कन्यामृतुकालभयात् पिता' इति च । अतो निन्दावचनानि निषेधमेवोपोद्बलयेयुः । ननु नायं विधिः । 'न रजस्वलां परिणये:' इति वचनाभावात् । तथाप्यर्थापत्त्या प्रतिषेधो भवितुमर्हति उपाकर्मणीव । तत्र हि 'औदयिके सङ्गवस्पर्शे श्रुतौ पर्वणि चार्कभे' इत्यादिवचनेन, उत्तराषाढाचतुर्दशीप्रभृतीनां वेधो यथा निषिध्यते एवमिहापि 'नोपरुन्ध्याद्रजस्वलाम्' इति वचनेन प्रतिषेधमभ्युपगच्छामः । ननु तत्र हि 'नोत्तराषाढसंयुते' इत्यादिवचनैः स्पष्टं प्रतिषेध इति चेत् इहापि 'नोपरुन्ध्यात्' इत्यादिवचनैः स्पष्टमेवास्ति प्रतिषेध इति गृहाण । आस्तां तावदिदम् । अविद्यमानेऽपि स्पष्टं प्रतिषेधे निन्दावचनेभ्य एवापूर्वत्वात् विधिं कल्पयामः इति प्रपञ्चितमधस्तात् । नहिनिन्दान्यायोपि परिहृतः । अथापि भवतः श्रद्धामनुरुध्याभ्युपगच्छामोऽर्थवादत्वं निन्दावचनानां एवमप्यर्थवादोऽन्यतः सिद्धमर्थमवद्योतयति, न तु प्रापयतीति न्यायेन अत्रापि शिष्टाचारसिद्धं रजस्वलोद्वाहप्रतिषेधमेवावद्योतयतीति ब्रूमः । न च 'कथमाचारः स्मृत्या प्रत्यभिज्ञाप्येत' इति प्रहसितव्यम् । 'निवीतं मनुष्याणां प्राची-

नावीतं पितृणामुपवीतं देवानुपव्ययते देवलक्ष्ममेव तत्कुरुते' इत्यत्र सौकर्याय लोकतः सिद्धमेव मनुष्याणां निवीतमनुवदतीदं वाक्यमिति उपवीताधिकरणे मीमांसकैः व्यवस्थापितत्वात् । तस्मादपि सिद्धमृतुमतीविवाहः शास्त्रतः प्रतिषिध्यत इति ॥

अत्रापरे प्रत्यवतिष्ठन्ते— 'त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्' इत्याह भगवान् बोधायनः । तदेतत्प्रतीक्षणं गौणकालमेवोपस्थापयेत् । कस्मात् । तथा दर्शनात् । यथा— माधवाचार्याः 'दृष्टे तु रजसि सत्स्वपि पित्रादिषु कञ्चित् कालं प्रतीक्ष्य तदुपेक्षणेन स्वयमेव वरं वरयेत्' इत्युक्त्वा पूर्वनिर्दिष्टं बौधायनं वचनमुदाजहार । अन्यथा 'त्रीणि वर्षाणि' इति वचनोदाहरणमनर्थकमेव स्यात् । तस्मात् बोधायनो रजसोऽनन्तरं गौणमेव कालं विदधाति । ननु उपक्रमे 'अपि वा गुणहीनाय नोपरुन्ध्यात् रजस्वलाम्' इति वदन् रजस्वलायाः असंस्कृतायाः कन्यायाः निन्दां श्रावयति; सा च प्रतिषेधे कारणं भवितुमर्हतीत्यवोचाम । तस्मादुपरितनं 'त्रीणि वर्षाणि' इति वचनमापत्कल्पमेवोवस्थापयेत् इति चेन्न । 'दद्यात् गुणवते कन्यां नग्निकां ब्रह्मचारिणे' इति

नग्निकोद्वाहं श्लाघयित्वानन्तरं तदेव व्यतिरेकमुखेन प्रशंसति 'अपि वा गुणहीनाय नोपरुन्ध्यात् रजस्वलाम्' 'त्रीणि वर्षाण्यृतुमती यः कन्यां न प्रयच्छति । स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम्' इत्यादिभिर्वचनैः । अनन्तरं 'न याचते चेदेवं स्यात् याचते चेत् पृथक् पृथक्' इति श्लोकं पठित्वा अनन्तरं 'त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम्' इत्यब्रवीत् । अतः प्रकरणं पर्यालोचयतां गुणवद्वरालाभे गौणतया रजसः प्रादुर्भावानन्तरं वर्षत्रयं यावत् प्रतीक्षणं विधीयत इति स्फुटमेव । न चेदं प्रकरणं गुणवते ब्रह्मचारिणे नग्निकाप्रदानमेव व्यतिरेकमुखेन प्रशंसतीति प्रत्यवस्थातव्यम् । 'त्रीणि वर्षाणि काङ्क्षेत' इत्यस्य वैयर्थ्यापत्तेः । न चाऽयं न विधिः, अर्थवादोऽयमिति वाच्यम् । अनुपपन्नत्वात् । 'नोपरुन्ध्यात् रजस्वलां' इति रजस्वलोपरोधो दोष इति सामान्यतो ज्ञायमानः विशेषमाकाङ्क्षते । सोऽयं विशेषः उपरितनवाक्येन पूर्यते 'त्रीणि वर्षाण्यृतुमतीं यः कन्यां न प्रयच्छति' इत्यनेन । सोऽयं भ्रूणहत्यारूपो दोषः रजोदर्शनानन्तरं त्रिवर्षात्यय एव भवतीति स्फुटे वाक्यार्थे कथमापत्कल्पतयाऽस्य सङ्कोचः सङ्गच्छेत । अत एवेदं प्रकरणं व्याचक्षाणो गोविन्दस्वामी 'ऋतुमत्याः कन्यायाः अप्रदाने

भ्रूणहत्यातुल्यो दोषो भवतीत्येतद्वक्तुकामः कन्यादानप्रकरणमारभते' इत्यब्रवीत् । अपि च वर्षत्रयमध्येपि यदि याचमानाय गुणवते वराय न ददाति तदैव पित्रादेः भ्रूणहत्यादोषं प्रशास्ति भगवान् बोधायनः 'न याचते चेदेवं स्यात्' इति वचनेन । सर्वमिदमालोच्यैव 'अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ' (याज्ञ. १. ६४.) इति वचनं व्याख्यायन् 'एतच्चोक्तलक्षणवरसंभवे वेदितव्यम्' इत्याह श्रीमान् विज्ञानेश्वरो मिताक्षरायाम् । तस्माद्रजसोऽनन्तरं विहितः कालः गौणो भवितुमर्हति । ननु नायं गौणो भवितुमर्हति, तद्वाचकपदाभावात् । नेति ब्रूमः भवत्पक्षेपि वाचकपदाभावात् । तर्हि विनिगमनाविरह इति चेन्न । उक्तहेतुभिः गौणकालस्य स्पष्टं प्रतीयमानत्वात् । तस्मात् 'त्रीणि वर्षाण्यृतुमती काङ्क्षेत' इति वचनेन गौण एव कालो विधीयत इति । एवं प्राप्ते ब्रूमः— नानेन वचनेन गौणकालो विधीयत इति । कस्मात् । प्रमाणाभावात् । तथा हि 'दद्यात् गुणवते कन्यां नग्निकां ब्रह्मचारिणे' इति गुणवते वरायाप्रौढां दद्यात् इति विधाय गुणवद्वरलिप्सया कदाचिदयं कालमतिपातयेदिति शङ्कित्वा स एव भगवानब्रवीत् 'अपि वा गुणहीनाय नोपरुन्ध्यात् रजस्वलाम्' इति । रजस्व-

लोपरोधनिषेधपूर्वकं गुणहीनायापि दानमुक्त्वा पुनः स एव कथं गुणवद्वरलिप्सया वर्षत्रयप्रतीक्षणमृतोरनन्तरं विदधातीत्यभ्युपगन्तुं प्रभवामः, विप्रतिषेधात् । ननु 'अपि वा गुणहीनाय' इति वचनं गुणवद्वरालाभे अस्तु 'अविद्यमाने सदृशे गुणहीनमपि श्रयेत्' इत्युपसंहारे दर्शनादिति चेन्न । नोपरुन्ध्यात् रजस्वलाम्' इति वाक्यशेषविरोधात् । न चायमर्थवादो नग्निकाविवाहप्रशंसायै स्यादिति वाच्यम्; 'नोपरुन्ध्यात्' इति प्रतिषेधविधेः श्रूयमाणत्वात्; यथाश्रुतिगृहीतार्थभङ्गप्रसङ्गेन देवताधिकरणन्यायविरोधाच्च । अपि च किं 'अपि वागुणहीनाय' इत्ययमर्थवादः आहोस्वित् 'नोपरुन्ध्यात् रजस्वलाम्' इति अथवोभयमपीति तावत् पृच्छामः । यद्याद्यः तर्हि नोपरुन्ध्यात् इति विधिः प्रतिषेधात्मको भवितुमर्हति; अथ द्वितीयः तर्हि अपि वा गुणहीनाय' इत्यत्र विधिरङ्गीकर्तव्य इति गुणद्वरलिप्सया प्रतीक्षणप्रत्याशा भज्येत । उभयमप्यर्थवाद इति यद्युच्येत तर्हि कं नामार्थं वदतीति वक्तव्यम्; अपि च 'अपि वा' इति पक्षान्तरविधानद्योतकौशब्दौ पीडितौ स्याताम् । वयं तु पश्यामः रजस्वलानुपरोधपूर्वकं गुणहीनायापि प्रदानं पक्षान्तरेण विदधातीति । नन्वत्र सामान्यतो ज्ञायमानो दोषो विशेषमाकाङ्क्षते स च विशेषो-

ऽनन्तरवचनेन पूर्यत इत्यवोचाम ; 'बाढमवोचः, नैतन्न्याय्य-मुत्पश्यामः ; 'तथाहि– न हीदं, 'नोपरुन्ध्यात् रजस्वलाम्' इति वचनं विशेषमाकाङ्क्षते । प्रतिषेधवचनं हीदं, न पुनर्दोषस्मारकं 'कालेऽदाता पिता वाच्यः (मनु.९.४.) इतिवत् । अथोच्यते प्रतिषेधबलादेव दोषमनुमिमीमहे दर्वीहोमन्यायेनेति, तदपि न संगच्छते । उत्तरत्र 'त्रीणि वर्षाण्यृतुमती' इति दोषस्मारकवचनोपलम्भेन वाक्यभेदप्रसङ्गात् । तस्मान्नात्र दर्वीहोमन्यायस्यावकाशः । तर्हि 'त्रीणि वर्षाणि' इति वाक्योदितं वर्षत्रयप्रतीक्षणं नोपपद्येतेति चेत् समान एवायं दोषः श्रीमतामपि पक्षे । यदि गुणवद्वरलिप्सया प्रतीक्षणम् , तर्हि 'त्रीणि वर्षाणि' इति मर्यादाकरणमनुपपन्नम् । कदाचित् तावतापि कालेन गुणवद्वरो न लभ्येत । यावद्गुणवद्वरलाभस्तावदेव प्रतीक्षणं न्याय्यं भवितुमर्हति । अपि च गुणवद्वरलिप्सया प्रतीक्षणमभ्युपगच्छताम् 'दद्यात् गुणवते कन्यां नग्निकां ब्रह्मचारिणे' इति वाक्यं मुख्यकालं विदधातीति वाचारंभणमेव । यदा हि गुणवान् वरो लभ्यते तदैव मुख्यकालो भवति । नात्र वयोवस्थाविशेषादिनियमः संगच्छते इति सुधियो विभावयन्तु । तस्मादसङ्गतमिदं प्रत्यवस्थानम् । कामञ्चेदं वचनं विशे-

षमाकाङ्क्षताम्, कामञ्चानन्तरवचनेन पूर्यताम्, एवमपि न सर्वात्मना दोषाद्विनिर्मोक्षः । गुणवद्वरलिप्सया वर्षत्रयं यावत् प्रतीक्षमाणस्य 'अपि वा गुणहीनाय' इति व्याकोपो दुष्परिहार एवेत्यधस्तादवोचाम । तस्मादन्वाख्यमेवेदमपूर्वमेकवाक्यतासंपादनम् । परमार्थतस्तु 'दद्यात् गुणवते कन्यां नग्निकां ब्रह्मचारिणे' इति मुख्यकालं विधायानन्तरम् 'अपि वा गुणहीनाय नोपरुन्ध्यात् रजस्वलाम्' इति गौणोपि कालः विधीयते । अनन्तरं निन्दापुरस्सरं आपत्कल्पं विधातुं प्रवर्तते 'त्रीणि वर्षाण्यृतुमती' इत्यारभ्य इत्येवाभ्युपगन्तव्यमन्यथानुपपद्यमानत्वात् । यद्वोविन्दस्वामिवचनं तदस्माकमेवानुकूलम् । 'अप्रदाने ऋतुमत्याः कन्यायाः (तिष्ठन्त्याः) दोषो भवति' इत्यन्वयसंभवात् । ननु रजसोनन्तरं विधीयमानस्यापत्कल्पत्वे 'त्रीणि वर्षाणि काङ्क्षेत' इति प्रतीक्षणं नोपपद्येतेति चेत् न । पित्रादीनां तावदेवापत्कल्पेपि अधिकारः इति प्रदर्शयितुं प्रवृत्तत्वात् तस्य । ननु 'ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्' इत्यनन्तरवचनेन कन्यायाः अपि चतुर्थ एव वर्षेऽधिकारः, ततो नेति स्यात् इति चेत् भ्रान्तोसि । नानेन वचनेन तदनन्तराः पञ्चमादयो वत्सराः

स्वयंवरे प्रतिषिध्यन्ते; भिद्येत हि तदा वाक्यम् । अत एव 'असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे' इति नारदवचनानन्तरं आत्मनः पाणिमग्राहयत् इति शल्यपर्वणि श्रूयमाणं वृद्धकन्योपाख्यानं सङ्गच्छते । संस्कारात्मकत्वात् विवाहस्य पञ्चमादिवत्सराः स्वयंवरे न प्रतिषिध्यन्ते । तस्मात् सिद्धमृतुमतीविवाहः आपदि विहितः कल्प इति । यदुक्तं माधवाचार्याः अब्रुवन्निति तदापत्कल्पमेव ब्रवीतीति तद्वचनस्वारस्यादवगम्यते 'दृष्टे तु रजसि' इति तु शब्दस्वारस्यात् । यदपि विज्ञानेश्वराचार्याणामनुधावनं तदपि नाभीष्टं पुष्णाति । 'एतच्चोक्तलक्षणवरसंभवे वेदितव्यम्' इत्यत्र सर्वनाम्नैतच्छब्देन पूर्वनिर्दिष्टो भ्रूणहत्यारूपो दोषो भवत्यप्रयच्छताम्, अतोऽवश्यं काले प्रदातव्या कन्येत्येव प्रतिपादयति । न पुनर्ऋतुमत्या अपि विवाहं संशास्त्यनेन वचनेन; भिद्येत हि तदा वाक्यम् । अपि च 'अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ' इत्यत्रर्तुग्रहणेन प्राग्रजोदर्शनादेव विवाहकालः न पुनस्तदनन्तरमिति व्यङ्ग्यमर्यादया प्रतिपादयति भगवान् याज्ञवल्क्यः । तस्मादप्यसङ्गतं परेषां प्रत्यवस्थानम् ॥

स्यादेतत्— वसिष्ठो हि भगवानृतुमतीविवाहमेव मुख्य-

मभिप्रैति । यत्कारणम् 'कुमार्यृतुमती त्रीणि वर्षाण्युपासीत; ऊर्ध्वं त्रिभ्यो वर्षेभ्यो विन्देत् तुल्यं पतिम्' इत्याह । न च 'प्रयच्छेन्नग्निकां कन्यामृतुकालभयात् पिता' इत्युत्तरत्र दर्शनात् आपत्कल्पोऽयमिति प्रत्यवस्थातव्यम् । यत्कारणं 'अत्राप्युदाहरन्ति' इत्यारभ्य परेषां हि मतमुत्तरत्र ब्रवीति । तस्मात् आत्मीयेन मतेनर्तुमतीविवाह एव श्रेयान् इति वसिष्ठेन प्रकटितत्वात् साधुरेवायमृतुमतीविवाह इत्येवं प्राप्ते ब्रूमः— नैतदेवमिति । कस्मात् प्रमाणाभावात् । तथा हि— 'प्रयच्छेन्नग्निकां कन्यामृतुकालभयात् पिता । ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति' इति प्राग्रजोदर्शनात् विवाहं विधायानन्तरं दोषस्वरूपमपि विस्तरेण कथयति 'यावच्च कन्यामृतवः स्पृशन्ति कुल्यैः सकामामभियाच्यमानाम् । भ्रूणानि तावन्ति हतानि ताभ्यां मातापितृभ्यामिति धर्मवादः' इति । ननु एकीयमतमेतदित्यवोचाम । बाढमवोचः । न युक्त्युपेतमवोचः । 'ऊर्ध्वं त्रिभ्यो वर्षेभ्यो विन्देत् तुल्यं पतिम्' इति स्वयंवरमुक्त्वात्रापि कारणं प्राचीनाः ब्रुवन्ति इति वदन् 'पितुः प्रमादात्तु यदीह कन्या वयःप्रमाणं समतीत्य दीयते । सा हन्ति दातारमदीयमाना कलातिरिक्ता गुरूदक्षिणेव' इति वचनमुदाहरति; न पुनः

'प्रयच्छेत' इत्यादिकमपि; असंबन्धात्। अथापि भवतः श्रद्धामनुरुध्याभ्युपगच्छामः 'प्रयच्छेन्नग्निकां कन्याम्' इत्यादिकमपि परेषां मतमिति एवमपि आत्मीयमेवाभिप्रायं परमतोपदेशेन प्रकाशयति इत्यङ्गीकुर्मः, अन्यथानुपपद्यमानत्वात्। अस्त्वेवम्; तथापि पाठक्रमेणोपक्रमप्राप्तः मुख्यकालो भवतु; 'प्रयच्छेत्' इत्यादिकः पुनः गौणः स्यात्। नेति ब्रूमः। 'प्रयच्छेत्' इत्यत्र 'ऋतुकालभयात् पिता। ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति' इति वाक्यशेषविरोधात्। तस्मात् अर्थक्रमानुसारेणोपक्रमस्थविधानमाप्येव भवितुमर्हति। अत एवैतदेव 'कुमार्यृतुमती' इत्यादिवचनं स्वयंवरं विदधातीत्याह सर्वतन्त्रस्वतन्त्रः श्रीमान् हेमाद्रिः। यदत्र 'सकामामभियाच्यमानाम्' इत्यादिवचनावष्टम्भेन 'गुणवद्वरालाभे' इत्याद्यर्थः कैश्चित् समाकृष्यते। तदपि बौधायनविचारोक्तदिशापरिहारमर्हतीति दिक्। तस्मादप्यसङ्गतं परेषां प्रत्यवस्थानम् ॥

अथापि स्यात्—'काममामरणात् तिष्ठेत् गृहे कन्यर्तुमत्यपि। न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्' (मनु-९.८९.) इत्यगुणवते प्रदानं निन्दित्वानन्तरम् 'त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु कालादेतस्मात्

विन्देत सदृशं पतिम्' (मनु. ९. ९०.) इत्यब्रवीत् भगवान् मनुः । तदनुरोधेन बौधायनं वचनं व्याख्येयमिति चेत्, वयमपि बोधायनानुरोधेनमनुवचनमपि व्याख्यायतामिति ब्रूमः । मनोर्माहात्म्यं श्रुतिरपि प्रख्यापयतीति तदनुरोधः कर्तव्यः इति यद्युच्येत तदपि न सङ्गच्छते । भवेदेतदेवं यदि भगवता मनुना गौणतयापि स्त्रीणां रजसोनन्तरं विवाहोभ्युपगम्येत । तदेव तु न संभवति । प्रथमम् 'उत्कृष्टायाभिरूपाय वराय सदृशाय च। अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि' (मनु. ९. ८८.) इत्युत्कृष्टाय वराय प्रदानं प्रशास्ति; पुनस्तदेव प्रकारान्तरेण प्रशंसति 'गुणहीनाय न दद्यात्' इति । तत्र हि पठ्यते 'काममामरणात्' इति वाक्यम् । नानेन वचनेन गुणहीनायाप्रदानं आमरणमृतुमत्याः कन्यायाः पितुर्गृहे अवस्थानं चेत्यर्थद्वयं विधीयते, भिद्येत हि तदा वाक्यम् । 'तिष्ठेत्' इति च नायं विधिः; किन्तु औदुंबराधिकरणन्यायेन विधिवन्निगदोऽयमर्थवादो भवितुमर्हति । अपि चाग्रेपि 'स हि स्वाम्यादतिक्रामेत् ऋतूनां प्रतिरोधनात्' (मनु. ९. ९३) इति स एव भगवानब्रवीत् ऋतूनां प्रतिरोधनेन पित्रादीनां स्वामित्वमपैतीति । कथमिदं गौणत्वाभ्युपगमे सङ्गच्छेत । न

हि गौणकाले पित्रादीनां स्वामित्वमपैतीति क्वापि कर्मान्तरेषु दृष्टम् । ननु वर्षत्रयादूर्ध्वं हि पित्रादीनामधिकारो नास्तीत्यनेन वचनेन ज्ञायते, प्रकरणात् ॥ भवत्वेवं तथापि कथमृतूनां प्रतिरोधनमधिकाराभावे कारणमब्रवीत् यद्यनन्तरमृतोः कालो गौणः स्यात् । न हि गौणकालस्य निन्दोपपद्यत इति प्रागेवावोचाम । अपि च 'काममामरणात् तिष्ठेत्' इत्यत्र कामशब्दापिशब्दाभ्यां असंस्कृताया ऋतुमतीत्वं निन्द्यमेवेति वचनस्वारस्यादवगम्यते । तस्मात् 'त्रीणि वर्षाण्युदीक्षेत' इति वचनमन्यथानुपपद्यमानमापत्कल्पमेव विदधातीति अभ्युपगन्तव्यम् ॥

अपि च 'न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्' इत्यत्र यदि प्रतिषेधात्मको विधिरभ्युपगम्येत 'अपि वा गुणहीनाय (दद्यात्)' इति बौधायनोक्ताऽभ्यनुज्ञा पीड्येत । तस्मात् केवलमर्थवादोऽयं व्यतिरेकमुखेन प्राक्तनश्लोकोक्तमुत्कृष्टवरप्रदानमेव प्रशंसतीत्युत्पश्यामः । न क्वापि गुणहीनाय प्रदत्ता कन्येति प्रायश्चित्तमनुष्ठीयमानं विहितं वोत्पश्यामः, इत्येतदप्यत्रार्थवादत्वे कारणं द्रष्टव्यम् । एवं 'विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्ष्व' इत्यत्र यथात्यन्तनिन्दितं विषभक्षणमिति वचनव्यक्त्या गम्यते एवमिहापि 'का-

ममामरणात् तिष्ठेत् गृहे कन्यर्तुमत्यपि' इत्यत्रासंस्कृतायाः ऋतुमतीत्वमत्यन्तनिन्दितामित्यर्थात् गम्यते । अन्यथा 'अपि वा मातरं गच्छेदमंतु न कदाचन' इत्यत्रापि मातृगमनं क्वचिदनुज्ञायते इत्यभ्युपगन्तव्यं स्यात् । अपि च दशमाध्याये 'सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु । आनुलोम्येन संभूताः जात्या ज्ञेयास्त एव ते' (मनु. १०. ५.) इत्यत्रानृतुमत्या एव पत्नीत्वं अभिनन्दति; न पुनर्विपरीतम् । तस्मान्न गौणतया ऋतुमतीविवाहं मनुरभिप्रैतीत्यङ्गीकर्तव्यम्—

स्यादेतत् । 'सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ॥
आनुलोम्येन संभूताः जात्या ज्ञेयास्त एव ते । (म.१०.५.)

इति वचनेनाक्षतयोन्या एव पत्नीत्वमभिनन्दति । न पुनरनृतुमत्याः । ननु अक्षतयोनिः 'ऋतोः प्राचिभवे वयसि वर्तमाना' इति प्रथममेवावोचाम भूमौ । बाढमवोचः । तत्तु कथमुच्छ्वसितुमपि प्रभवति श्रीमद्विमर्शग्रन्थानुसारिषु जीवत्सु । तत्र हि विमर्शे अक्षतयोनिरस्पृष्टमैथुनेति विज्ञानेश्वरापरार्कमेधातिथिप्रभृतीनां महतामनुरोधेन व्यवस्थापितं किमिति नोत्पश्यसि । अत्र वदामः । सत्यं नोत्पश्याम एव । तथा हि— 'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः ।

नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः' (मनु.८.२२६.) इत्यत्र अकन्या प्राप्तरजस्कैव; क्षतयोनिशब्दश्च तत्र कुल्लूकभट्टेनोक्तः तमेवार्थं ब्रवीतीति भूमिकायामेवावोचाम । तमेवार्थमनुवदन् जातिलक्षणकथनावसरे दशमाध्याये अक्षतयोनिशब्दं प्रायुङ्क्ते अप्राप्तरजस्कैवेत्यस्यार्थोऽङ्गीकर्तव्यः । अत एव कुल्लूकभट्टः 'स्वभार्यायां कन्यावस्थायामेव कृतविवाहसंस्कारायाम्' (मनु. ९—१६६.) इत्यब्रवीत् । न चात्रापि कन्याशब्दस्य अविवाहितेत्यर्थः अभ्युपगन्तुं शक्यते भवता । 'कन्यावस्थायाम्' इति विरोधात् । न हि स्त्रीणां क्वापि अविवाहितावस्थेति काचिदवस्था शरीरसंबन्धिनी श्रूयते अनुभूयते वा । अपि च वाक्यशेषविरोधः दुष्परिहारः । 'अविवाहितावस्थायामेव कृतविवाहसंस्कारायाम्' इति कथं संभवति । तस्मात् कन्यात्वमिति स्त्रीणां शरीरसंबन्धिनी काचिदवस्था भवति तदैव कृतविवाहसंस्कारायाम्' इति टीकाकारोऽभिप्रैतीति अभ्युपगन्तव्यम् । यदत्र 'कन्यावस्थायामेव कृतविवाहसंस्कारायाम्' इति टीकाकारेणोक्तं तदेव भगवानाह 'सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु' इति । 'याः पुनरक्षतयोनय एव पत्नीत्वमापन्नाः' इति तस्यार्थो भवितुमर्हति । तदेव 'कन्यावस्थायामेव

कृतविवाहसंस्कारा ' इति व्याख्यातमाचार्येण ; अतः ' अक्षत-योनिः कन्यावस्थायां वर्तमाना इति सिद्धं । एवंस्थिते कथम-त्राक्षतयोनिरस्पृष्टमैथुना स्यात् ॥ न ह्यस्पृष्टमैथुन्यामिति का-चिदवस्था स्त्रीणां संभवति । अवस्थायाः अन्तरेणबाह्य-संबन्धं तत्तत्कालेन शरीरे संभाव्यमानत्वात् ; यथा बाल्यस्था-विरादिका । पुरुषसंबन्धो ह्यागन्तुकः न तु शारीरः । शारीरा तु स्त्रीणां कन्याख्याऽवस्था । तस्मादप्राप्तरजस्कैव अक्षतयो-निरित्येवार्थे परिगृहीते 'सर्ववर्णेषु' इति वाक्यमुपपन्नं भवति। ननु ' सर्ववर्णेषु ' इति व्याख्यानावसरे नैतत् ' कन्यावस्थाया-मेव' इत्यादिवाक्यमुपलभामहे व्याख्याने ; अतस्तदस्तीत्युदाह-रणं प्रतारणायैव केवलं स्यात् इति चेन्न । न वयं तत्रैव कुल्लू-कभट्टवचनमस्तीत्यवोचाम । किन्तु टीकाकारः एवमब्रवीत् इत्येवावोचाम । कुत्राब्रवीदिति चेत् ब्रूमः । औरसादिपुत्रक-थनपरे ' स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम् । तमौ-रसं विजानीयात् पुत्रं प्रथमकल्पितम् ' । (मनु. ९. १६६.) इत्यत्र ' स्वभार्यायां कन्यावस्थायामेव कृतविवाहसंस्कारायां यं स्वयमुत्पादयेत् तं पुत्रमौरसं मुख्यं विद्यात् ' इत्यब्रवीत् । अतो ब्रूमो दशमाध्यायस्थितमेव ' सर्ववर्णेषु तुल्यासु पत्नी-ष्वक्षतयोनिषु' इति वाक्यं दृष्ट्वात्रैवं 'कन्यावस्थायामेव' इति

व्याख्यानमकरोदिति । तस्मादपि 'पाणिग्रहणिका मन्त्राः' इत्यत्र श्रूयमाणः कन्याशब्दस्तादृशावस्थायामेव वर्तमानामर्थादनृतुमतीमेवावद्योतयतीति ब्रूमः ॥

स्यादेतत् 'सर्ववर्णेषु तुल्यासु' इतिवाक्येन विहितो विवाहः मुख्यः स्यात् । न च कथमिदं विवाहविधायकं वाक्यं स्यात्, 'उद्वहेत द्विजो भार्यां' (मनु. ३. ४.) इति स्पष्टमेव विधेः श्रूयमाणत्वादिति प्रत्यवस्थातव्यम् । 'परामर्शं जैमिनिरचोदनाचापवदति हि' (ब्र.३.४.१८.) इत्यधिकरणन्यायेन विद्यमानमपि विधिमनादृत्य अपूर्वत्वादर्थसंयोगस्य कृत्वाचिन्तया कल्प्यमानेपि विधौ दोषाभावात् । 'त्रीणि वर्षाण्युदीक्षेत' इति वाक्येन रजसोऽनन्तरं विवाहः विधीयमानः गौणो भवतु । तत्र किं तव छिन्नम् । अत एव श्रीमान् माधवाचार्याः 'यः पुरुषः विहितानुष्ठानं प्रतिषिद्धवर्जनम्, प्रमादकृतपापस्य प्रायश्चित्तं कर्तुं शक्तोऽपि न कुर्यात्, तद्विषयाणि 'भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता' इत्यादिवचनानीत्यब्रुवन् । नैवं स्यात् । मुख्यकालो हि गर्भाष्टमं वयः इति प्रागेवावोचाम । तदनन्तरं यावद्रजोदर्शनमेव कालो गौणो भवितुमर्हति अन्यथानुपपद्यमानत्वात् । अस्मादेव कारणात् 'त्रीणि वर्षाण्युदीक्षेत'

इति वाक्यमापत्कल्पमेव विदधातीत्यकामेनाप्यभ्युपगन्तव्यम् । यत्तु विज्ञानेश्वरादीनामनुधावनं तदपि नास्माकं प्रतिकूलं भवति । भवत्वन्यत्र अक्षतयोनिशब्दस्यास्पृष्टमैथुनेत्यर्थः । मनुस्मृतौ तु श्रूयमाणोऽयं शब्दः अन्यथानुपपत्त्या व्याख्यानेन चाप्राप्तरजस्कामेव ब्रवीतीति अवश्यमङ्गीकर्तव्यम् । यदपि माधवाचार्याणामनुधावनं तदपि नाभीष्टं पुष्णीयात् । अशक्तस्य पापं नास्तीत्येव तेषां वचनादवगच्छामः । न चैतावता रजस्वलोद्वाहमप्यनुजानातीत्यमूढोऽध्यवस्यति; भिद्येत हि तदा वाक्यम् । अत एव व्यवहारकाण्डे 'केरलदेशे ऋतुमती विवाहो न दोषाय' इति ब्रुवन् स एव माधवाचार्यः केरलवासिनामेवर्तुमतीविवाहमनुजानाति, न पुनः परेषां । अत्रापि देशभेदेन दोषाभावस्मरणं लौकिकेष्वेवदायभागादिषु न पुनरलौलिकश्रेयःसाधनभूतेषु चोदनालक्षणेषु धर्मेषु । इतरथा होलाकाधिकरणन्यायविरोधः प्रसज्येत । यथा चैतत् तथा व्यवहारकाण्डं पर्यालोचयतां स्फुटमेव । तस्मात् सिद्धमृतुमतीविवाहं प्रतिषेधत्येव भगवान् मनुरित्यसङ्गतमेव परेषां प्रत्यवस्थानम् इति सिद्धम् । एतेनापरे स्मर्तारो व्याख्याताः— तदेवं प्रायश्चित्तनिन्दानिषेधैस्त्रिभिर्हेतुभिः प्रौढोद्वाहः प्रतिषिध्यत एव स्मृतिभिरिति सिद्धम् ।

तस्मात् श्रुतिस्मृतीतिहासपुराणलोकेभ्यः प्रतिषिध्यमानमृतुमतीविवाहं श्रुतिसिद्धमिति प्रतिष्ठापयितुं प्रवर्तमानाः श्रेयोद्वारमेव बाधन्ते । अत्र वयोनिर्णयोक्ताः सकरुणमुक्तयः अनुसन्धेयाः । इति सर्वं शिवम् ॥

बाणरामगजैकाब्दे १८३५ प्रमादीनामवत्सरे ।
मासि भाद्रपदेष्टम्यां संपूर्णेयं कृतिः शुभा ॥

इति श्रीविश्वजिन्महाव्रतसर्वतोमुखवाजपेयाद्यनेकमहाक्रत्वनुष्ठानेन
पवित्रीकृतात्मनां पञ्चनदक्षेत्रे कवेरजातीरे लब्धजन्मनां ब्रह्म-
भूयङ्गतानां कृतकृत्यानां अस्मत्तातचरणानामशेषविद्या-
गुरूणां श्रीबालकृष्णमखिनामन्तेवासिनां ताम्रातर-
ङ्गिण्याः परिसरवर्तिनि मलयाचलसानुनि
कडयं ग्रामे कृतावताराणां वाधूलकुल-
मुक्तामणीनां परममाहेश्वराणां श्रीगुरुस्वामि-
शास्त्रिणां सूनुना नटेशेन विरचितायां
परिणयमीमांसायां स्मृत्यर्थविचारो नाम
तृतीयोऽध्यायः ॥
समाप्तश्चायं ग्रन्थः ॥



॥ श्रीः ॥


॥ विद्वद्वर्याणां अभिप्रायः ॥

शेषं समावेशनसूत्रमत्र
विवृण्वतो विद्वदपश्चिमस्य ।
नटेशनाम्नो विदुषो विशालां
मतिं मनो मेऽद्य महीकरोति ॥ १ ॥

कुम्भकोणम्

इत्थं अद्वैतसभापण्डितः,
क. कृष्णशास्त्री ।

शुद्धिपत्रिका ॥



पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	२	स्मृा	स्मृ
३	१६	क्वचिनृ	क्वचिन्नृ
४	१३	कन्यां	कन्या
८	१३	अक्षयो	अक्षतयो
१०	१	८१	८
१३	८	१५	२५
१६	१४	मत्रः	मन्त्रः
१८	१०	तथानो	तथानु
२२	३	लुप्यत	लुप्यत
२३	१८	य	यः
२४	२	समासवेशन	समावेशन
२७	६	पुनाऋ	पुनर्ऋं
,,	८	व्यवायो	व्यवायः
२९	१२	गमनपि	गमनमपि
३२	१८	कृताया	कृतायाः
३७	११	प्रामाण	प्रमाण
४०	१	स्मृतीरिव	स्मृतय इव
४२	१५	सिद्ध्यते	सिद्ध्येत्

४४	१६	श्रत्या	श्रुत्या
,,	,,	अहोस्वित्	आहोस्वित्
५२	१५	ग्रायश्चित्त	प्रायश्चित्त
५३	६	सुमुच्चय	समुच्चय
,,	८	३०७	३०८
,,	१०	व्रातान्त	व्रतान्त
५७	१८	नहिनिन्द	नहिनिन्दा
,,	१९	भवदेत	भवेदेत
५९	१	देवानुप	देवानामुप
,,	३	उपवीत	निवीत
,,	१८	वस्थाप	पस्थाप
७३	७	श्रूयमाणात्वा	श्रूयमाणत्वा
७४	५	माधचा	माधवाचा
,,	१३	अलौलिक	अलौकिक
७५	१	लोकेभ्यः	लोकैः
७५	५	दीनाम्	दिनितु